# Bhagavan-nama-sahasram (Vol.1)

## with

# DRAMIDOPANISHAD

## Sara & Tatparya-Ratnavali

## of

## Sri.Vedanta Desika



By

Pandit Sri.AnantAcArya swAmy

PudukkOttai Sri A.SrinivAsarAghavan swAmy

DevanArviLAgam Sri.TiruvengadAccAr Swamy



Swami Desikan

Tatparya-Ratnavali and Dramidopanishad saaram grantha karthaa

# Bhagavan-Nama-Sahasram

with

## DRAMIDOPANISHAD
## SARA & TATPARYA-RATNAVALI

of

SRI VEDANTA DESIKA

**(Volume 1)**

*Edited by:*

PANDIT V. ANANTACHARYA

and

A. SRINIVASARAGHAVAN

# Sri Mukham
OF
# His Holiness Sri Alagiasingar
OF
# The Ahobila Mutt.

॥ श्री ॥

॥ श्रीमते श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः । श्रीमते वकुलभूषणमहादेशिकाय नमः

॥श्रीमते भगवते भाष्यकाराय नमः । श्रीमते निगमान्त महागुरुवे नमः ॥

॥ श्रीमदादिवण् शठकोपयतीन्द्रमहादेशिकाय नमः ॥

द्रामिडाम्नायगाथासु शठकोपमुनीरितम् ।
द्रमिडोपनिषत्सारात् दिव्यनामशतं तथा ॥
तात्पर्यरत्नावल्तिो दिव्यनामसहस्रकम् ।
संगृह्य तेषु सर्वेषु चतुर्थीं प्रणवं नमः ॥
संयोज्य सम्यक् संमुद्रय प्रकाशितमिदं बुधैः ।
विष्णोर्नामसहस्रं यत् तत्तुल्यमिदमप्यतः ॥
एतेनैवार्चयेत् विष्णुं गृहे वाऽप्यालयेऽपि वा ।
योऽर्चयेत् लभते सोऽपि पुरुषार्थचतुष्टयम् ॥
श्रीनृसिंहः शठारिश्च निगमान्तगुरुस्तथा ।
तस्मिन् प्रीतिं समाकुर्युः सन्तस्तुष्टिमवाप्नुयुः ॥
इत्थं श्रीरङ्गशठजिद्योगिनाऽऽमोदिता भृशम् ।
नामावलिः चिरं जीयात् शठारिहृदयोद्धृता ॥

मुकाम् - तिरुव्वल्लूर
१९—६—५१

श्रीशठकोप श्रीः

॥ श्रीः ॥

When this work was more than half way through the Press, I came to know that "Desika darsana-nanda" Thevanarvilagam Sri Trivenkatacharya Svami has been at this task of compiling a Namavali — in fact several namavalis — from the Tatparya-Ratnavali for several years and had even begun the printing of it. At once I went to the village to see the Manuscripts, if any. Sri Trivenkatacharya Svami's son Sriman Lakshminarasimhacharya — who has been installed only recently (on 9-2-51) as the 43rd pontifical Head of the Ahobila Math at Trivellore — kindly took me to his library and showed me several note books with the Namavali, all written by the hand of his aged father. He gave me one note book which was complete and also eight pages of printed matter, an extract from which is given below.

It contains first the ten introductory Slokas of Dramidopanishad Tatparya Ratnavali followed by the two introductory Slokas of Saram. Then comes the Namavali as follows:—

திருவாய்மொழி—முதற்பத்து
(உபாயத்வோபயுக்தமான சேவ்யத்வப்ரதிபாதகம்)

| ஸாரம் | ரத்நாவளி | திருவாய்மொழி |
|---|---|---|
| परं | (आद्यायित्थं) परत्वात् | உயர்வற உயர்நலம் |
| निर्वैषम्यं | अखिलसमतया | வீடுமின் முற்றவும் |
| .... | .... | .... |

अनघविश्राणनपरं मुकुन्दं अव्याजोदारभावात् பொருமாநீள்படை
निध्यायन् मुनिरधिजगौ अमनुत शतके माधवं
आद्यशतके ॥ ॥३॥ सेवनीयम् ॥ ॥२३॥

முதல் திருவாய்மொழி — (உயர்வற உயர் நலம்
(பரத்வப்ரதிபாதகம்)

| ரத்நாவளி | திருவாய்மொழிப் பாட்டின் தலைப்பும் ப்ரதிபாத்யபதமும் |
|---|---|
| निस्सीमोद्यद्गुणत्वात् | உயர்வற உயர் நலம் |
| अमितरसतया | மனனகமலமற — உணர்முழு நலம் |
| सर्वतत्त्वेषु पूर्तेः | பரந்த—எங்கும் பரந்துளன் |
| पश्यन् योगी परं तत्पदकमलन-<br>तावन्वशात् आत्मचित्तम् ॥११॥ | (கரவிசும்பு—பரனடிமேல்) |

In the Notebook several Namavalis have been compiled—one *with the name of Sri Devadhiraja of* Kanchi at the end of every name, another of Sri Sarngapani of Kumbakonam and a third indicating the logical sequence of the name in one verse, one Dasaka, one Sataka and the Prabandha as a whole in the following lines.

ओं सेवायोग्याय नमः ।
ओं परत्वगुणविशिष्टाय देवाधिराजाय नमः ।
ओं निस्सीमोद्यद्गुणत्वात् परत्वगुणविशिष्टाय ज्ञानस्वरूपाय श्रीमते नारायणाय नमः ।
ओं अमितरसतया परत्वगुणविशिष्टाय अखण्डानन्दस्वरूपाय श्रीमते नारायणाय नमः ।

It is with great pleasure that I acknowledge my gratefulness to the Svami for thus helping me in this work.

22-4-51 **SRINIVASARAGHAVAN**

# PRELUDE

Claimed and acclaimed it can be without any hesitation that this work — consisting of what may be regarded as twin poetical compositions called respectively Dramidopanishad-sara and Dramidopanishad - Tatparya - Ratnavali — of Sri Vedanta Desika is absolutely unique in the history of any literature or any language of any country or of any time. With equal intrepidity it can be asserted that no poet or writer other than Sri Vedanta Desika could have been the conceiver and author of such a work. Both are called Upanishads which are according to their true meaning and significance regarded to be the inspirations and expressions of those in intimate touch with The Divine. What the Tamil people commonly call the Tamil Vedas are by this poet-philosopher declared to be Upanishads. This deliberate distinction is only too well-rounded. Vedas are mainly ritualistic ; the Upanishads are exclusively concerned with the knowledge and joy of the Divine. The description therefore of the Prabhandams as Dramidopanishad is not only apt, but unquestionable.

By themselves Sara and Ratnavali are both complete poetical works in Sanskrit in majestic metres. They both treat of God and His myriad qualities and characteristics in His infinite transcendence, in all His manifestations in His many incarnations and in relation to man as His creature, as the soul of his soul, and as his sovereign, sweet-heart and saviour.

originaluse

The works, no doubt, are two, but twins. In their nature and objective they are essences and summaries of the thousand and odd Tamil Stanzas of Sri Nammazhwar celebrated under the name of Tiruvaimozhi. The poem of Nammazhwar with the last word in each verse leading as the first word in the following verse and the division of the whole poem into tens of tens constitutes a marvellous piece of poetic art. The first of the twin works called Dramidopanishad-Sara may be regarded as intended for the senses of taste and smell, and the second called Dramidopanishad-Tatparya-Ratnavali for the sight and sense of beauty.

*The Dramidopanishad-Sara* consists of *26 Slokas*. The first two are introductory and the last four give a finish. The body consisting of twenty verses not only present to us the quintessence of each of the ten centuriums of Tiruvaimozhi, but reveals to us the concealed links in thought and plan between one centurium and another. The second called Dramidopanishad Tatparya Ratnavali is as its name implies a threefold art of abstracting the essential meaning and significance, of selecting a gem from each stanza, and of stringing the gems in the form of an artistic garland.

In this Ratnavali the essence, the spirit, the poetry the philosophy and all the beauty contained in each Tiruvaimozhi as a decadium of ten stanzas is summarised in a single sloka. Thus roughly for the thousand of the Alwar's songs, there are a hundred in this summary. The art is indeed a great art –a very fine art. It is comparable to the art of extractlng the essence of scents from the sweet fragrance of beautiful flowers. Nay more! To those who have admired the original

blossoms in Tamil, the essence in Sanskrit is not only reminiscent of the native fragrance in smell but also of the visible beauty of the form, the charm, and also the variety of the colours of the flowers culled. It is also comparable to the wonderful jeweller's art which for the making of a garland of gems or precious stones will be appreciated to consist in the selection in each case from a large number all of them apparently sparkling, in their artistic arrangement and in the workmanship of making a garland out of them. In both we may also discern and discover a guide to and a commentary on the principles and philosophy of Sri Vaishnavism and Visishtadvaitism of him who has been hailed by Sri Desika as at once the founder and the Kulapati of the school of Sri Vaishnavism.

In this publication the further task has been undertaken of extracting so to say an appropriate name of God from each of the ten stanzas forming the decadium. In this manner a new collection of a thousand names has been culled and coined. The work therefore may no doubt in its parallel purpose, be comparable to the composition known as Sahasra Nama in Sanskrit regarded as a part of Mahabharata. But the thousand names chosen and strung together here are even like gems of purest ray serene selected by Sri Vedanta Desika from the unfathomable caves of the ocean of Sri Sathakopa's poetry and philosophy. These thousand names have, therefore, the combined flavour and the joint aroma of what is called Ubhaya Vedanta or the dual philosophy embodied in the northern tongue of Sanskrit and in the southern tongue of Tamil. The union in this single and singular work of both these philosophies and systems is here represented and celebrated. laid bare and immortalised

The work is thus typically South Indian and truly representative of Ubhaya Vedanta Vaishnavism.

It has been said that God when He created the world also gave names to the myriad objects of His creation It seems now the turn of man, His creature to render unto his God and creator, a myraid names in grateful devotion calculated to convey man's own faith and philosophy. May we not also add that in this test and contest of naming, we men have come off with laurels and glory ?

"Vani Vilas"
Park Town, Madras,
31st Decr 1950.

V. V. SRINIVASAN.

## FOREWORD

The difference between a man who considers himself to be the body and a Rshi who has realized himself to be the Atman is said to be as great as between an atom and Mahameru, the greatest of mountains. The same difference obtains between a Rshi and an Azhwar or a saint who has realized and is immersed in God. Between ordinary Azhwars and Sri Nammazhwar who had realized God from the time of his birth, who devoted the entire span of the period of 33 years of his life on earth to being absorbed in God, who never devoted even a single moment to worldly affairs or spoke a single word in praise of mere man and who has been hailed as the Light of the Universe, a similar difference as between Paramanu and Mahameru exists.

An Azhwar is so called because he is immersed in the bliss of God-realization. Nammazhwar or Our Azhwar is so called because the Lord claimed him particularly as His own. Sri Nammazhwar in his Thiruvaimozhi has brought out the innumerable auspicious attributes of God. Just as Sri Narada asked Sri Valmiki at the beginning of Srimad Ramayana about the ideal person with good qualities (Gunavan), Sri Nammazhwar also begins Tiruvoimozhi asking his mind to uplift itself by paying homage to the Lord whose auspicious attributes like bliss (Ananda) have reached the highest possible pinnacle of perfection and which are not possessed in equal, leave alone superior, degree or measure by any one else. In his 1102 verses or Pasurams Sri Nammazhwar has sung in

praise of the innumerable auspicious attributes of the Lord.

Sri Vedanta Desika or the Teacher of Vedanta according to the title conferred on him by Lord Sri Ranganatha Himself has culled 1001 auspicious attributes from the verses sung by Sri Nammazhwar and put them in the form of Dramidopanishad-Sara and Tatparyaratnavali. The ten auspicious attributes selected from every ten verses (Dasaka) go to establish one main attribute of the Lord. The ten main attributes selected from ten Dasakas of verses go to prove the existence of a very important attribute of the Lord. The ten very important attributes culled from the ten Satakas or centuries (100 verses) prove beyond doubt the one all-important attribute of God on which depends the realization of the highest human aspiration of liberty from the bondage of Karma, equality with Divine beings and fraternity with fellow-beings.

This one chief auspicious attribute is given at the top of page 7 of the book. This shows that the Lord is Himself both the End and the Means......the Goal as well as the Way. The ten very important attributes which establish this are given on the same page. Pages 8 to 12 give the auspicious attributes culled from each Dasaka (ten verses) of each Sataka ( a hundred verses). Pages 47 to 136 contain the 1001-auspicious attributes in Sanskrit on one side and in Tamil on the other side of the page. Words given in Tamil contain actually the portion of the verse which leads to the conclusion that that auspicious attribute is referred to in that verse.

For those who know Tamil the reading of the Tamil portion first and the Sanskrit name next in the course of Aradhana or worship of God is recommended. For those who do not know Tamil the use of the Namavali at the time of Puja will be invaluable and for those who do not get time to perform Sahasranama Puja. Satanama Puja will be useful. Again for those who do not get time even for Satanama Puja. Dasanama Puja will be helpful. With this may be combined the Namavali of the Lord of the Divyadesa (holy place of pilgrimage where the Lord has manifested Himself in Archa form) to Whom the particular devotee is devoted Sri Vedanta Desika has out of his infinite mercy given for the benefit of mumukshus (those who want to be liberated from Samsara) the one name (containing the all - important auspicious attribute of the Lord) which can be repeated and realized even by those who have very little time at their disposal for Puja. This is :—

देवाय श्रीशाय स्वसिद्धेः करणाय नमः ।

Dramidopanishad Tatparya Ratnavali gives auspicious attributes in each verse, in each Dasaka ten verses), in each Sataka (hundred verses) and in the Tiruvaimozhi as a whole. Dramidopanishad Sara gives the auspicious attributes mentioned in each Sataka, Dasaka and the work as a whole

For a long time I had been desirous of worshipping the Lord with the aid of his Namavali instead of merely with Sri Vishnu Sahasranam which is ordinarily used. Sri Vishnu Sahasranam as is well-known was given out by Sri Bhishma in the presence of the

Lord Himself before his ascent to heaven. Sri Bhishma says:

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥

"These well-known names of the Paramatman arising from His having auspicious attributes which have been sung by the Rshis, I am going to tell you for the uplift of the atman."

As stated before the Namas or names discovered and realised by Sri Nammazhwar should be considered to be more appealing than those discovered by the Rshis.

Rshis are called Mantra-Drashta (मन्त्रद्रष्टार:) or those who have discovered the Mantras. Tiruvaimozhi is otherwise called Dramidopanishad which contains the quintessence of the meaning of all the Vedas. Sri Vedanta Desika, the master of all arts and the greatest poet, logician and philosopher the world has ever produced, calls Tiruvaimozhi 'Sarvia Sakha' (सार्वीयशाखा:) or the Veda which is intended for all and says that this Sarviya Sakha has been दृष्ट or discovered by Sri Nammazhwar (Vide verse 10 on page 15) In Sri Paduka Sahasram also Sri Vedanta Desika refers to Sri Nammazhwar as (आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तं) or one who has discovered the Dramadopanishad which is another form of the Vedas. One chief reason why the Dramidopanishad is great is that by studying it we are able to clear the doubts which arise in the interpretation of the Vedas.

In the Phalasruti of Sri Vishnu Sahasranam it is stated that those who recite Sri Vishnu Sahasranam get all the Purusharthas (पुरुषार्थाः). Similarly, Dramidopanishad also is said to be Sarvarthada (सर्वार्थदा), i. e. that which fulfils all the desires of people. The use of this Namavali (Dasa, Sata or Sahasra) will therefore cermainly lead to the realization of all that people long for, particularly Mukti or Liberation in addition to Dharma, Artha and Kama.

It will be seen from pages xiii to xvi that Their Holinesses the Acharyas of important mutts have recommended the use of this Bhagavan-namavali in the course of worship

Towards the end of December 1948 I mentioned my ardent desire to have this Bhagawannamasahasra published to Sri V. V. Srinivasa Iyengar, Ex-High-Court Judge and the leader of the Sahrdaya Samiti of which he has been pleased to count me as a member. He immediately handed over to me a manuscript which had been prepared by Sri Ubha. Ve. Pandit Anantacharya, ex-Pandit of the Pachiappa's College, Madras and stated that the manuscript had been given to him some time back and was awaiting publication. This we considered to be a God-send and we gave the manuscript to Sri Ubha. Ve. A. Srinivasaraghavan M. A. Sanskrit Lecturer, Raja's College, Pudukkottai to see it through the Press. But for his keen interest in the matter and indefatigable labours in carrying out the necessary changes in order to bring out the publication in its present form it would not have seen the light of day.

All thanks are therefore due to these great Bhagavata's through whom the Lord has been pleased to get this service rendered unto Him and to His devotees.

Sri V. V. Srinivasa Iyengar is also the President of Sri Krshna Sabha, Bombay, of which I happen to be a member. This publication is therefore, offered to all devotees of the Lord by Sri Krishna Sabha, Bombay through the Sahrdaya Samiti, Madras of which the following are members :-

1. Sri V. V. SRINIVASA IYENGAR, Vani Vilas, Park Town, Madras.
2. Sri V. ANANTACHRYA, Pranavasram, Krshnapuram, Madras.
3. Sri N. R. KRISHNASWAMI IYENGAR, Madura.
4. Sri A. SRINIVASARAGHAVACHARYA, M. A., Pudukkottai
5. Sri D. RAMASWAMI IYENGAR, Madras.
6. Sri R. RANGASWAMI IYENGAR, Tanjore.
7. Sri V. N. SRIRAMADESIKACHARYA, Oppiliappan Sannidhi.
8. Sri S. T. SRINIVASACHARYA, Kalyanapuram.
9. Sri E. D. SRINIVASACHARYA, Tiruvahindrapuram.
10. Sri A. S. IYENGAR, Sri Nam Andavan's, Asram, Srirangam.

If the publication is utilised by the devotees of the Lord for worshipping Him, all the trouble taken by the publishers will be more than amply repaid.

BOMBAY
The 31st December 1950. } A. S. IYENGAR.

श्रीः ।

### श्री वेदान्ताचार्यैः अनुगृहीतः

# द्रमिडोपनिषत्सारः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

---

सेव्यो योग्योऽतिभोग्यः शुभसुभगतनुः सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत् सत्पदव्यां सहायः
श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः ॥ १

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादिश्चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
षड्भिः स्वां पञ्चमाद्यैरनितरगतिततामाचचक्षे मुनीन्द्रः ॥ २

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराध्यं सरसभजनं स्वार्जवगुणम् ।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायन् मुनिरधिजगावाद्यशतके ॥ ३

2 द्विकाभ्यां ब्यष्टाङ्घ्रिर्दुरधिगमनीस्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्त्वं व्यवृणुत ।
तदादौ गाथाभिर्मुनिरधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह संगृह्य कृपया ॥ ४
परत्वाद्यैरित्थं परिचरणसक्तो गुणगणैः
प्रभुं सेवायोग्यं प्रथमशतके वीक्ष्य वरदम् ।
तमेव स्वात्यर्थप्रियमथ च भोक्तुं व्यवसितो
वरेण्यत्वं तस्य प्रथमवरणीयं प्रथयति ॥ ५
द्वितीयेऽतिक्लेशक्षणविरहमुत्तुङ्गललित
मिलित्स्वार्स्वादं व्यसनशमनं स्वाप्तिमुदितम् ।
स्ववैमुख्यत्रस्तं स्वजनसुहृदं मुक्तिरसदं
स्वकैङ्कर्योद्दिश्यं सुभगसविधस्थं निरविशत् ॥ ६
उपायत्वैकान्तं प्रथममिह सेव्यत्वमुदितं
ततश्च प्राप्यत्वौपयिकमतिभोग्यत्वमवदम् ।
द्वयं तत्स्वासाधारणतनुविशिष्टस्य गणयन्
तृतीये विश्वेशं शुभसुभगरूपं कथयति ॥ ७
अनीदृक्सौन्दर्ये तनुविहितसर्गादिसुभगं
स्वेसेवार्थाकारं प्रगुणवपुषं मोहनतनुम् ।
अपश्यल्लभ्यार्चाविभवमतिदास्यावहतनुं
सदा दृश्यं स्तुत्याकृतिमघविरुद्धाकृतिमिह ॥ ८

श्रियः कान्तोऽनन्तः शुभतनुविशिष्टः फलमसौ
फलावाप्तेर्हेतुः स्वयमिति च निर्धार्य शतकैः ।
इदानीं बुद्धिस्थक्रमत इह युक्त्या मुनिवरः
फलत्वं तस्यैव द्रढयति तदन्येषु विमुखः ॥ ९

स्थिरैश्वर्यं तुर्ये सहजबहुभोग्यं निरविशत्
मिथःश्लिष्टं क्लेशावहाहितुतुल्यं निजजनम् ।
कृतार्थीकुर्वन्तं प्रणयिभिषजं सद्बहुगुणं
स्वहेयस्वोपेक्ष्यं स्वमतफलमुचस्स्ववगतम् ॥ १०

उपायात्वं यत्तत् प्रथमशतकेऽभावयत विभोः
अनन्योपायस्तत् द्रढयति परं पञ्चममुखेः ।
निरीहस्तत्रादौ निरवाधिकनिर्हेतुकदया-
सरित्स्रोतः पद्मं शरणयति नाथस्य चरणम् ॥ ११

दयानिघ्नं भक्तैरघविमथतं प्रेमजनकं
जगद्रक्षादीक्षं स्मृतिजुषमहंभावविषयम् ।
शरण्यं दीनानां स्वरसकृतदास्याभ्युपगमं
प्रचख्यौ तं प्राप्तं प्रशकनकृतं पञ्चमशते ॥ १२

अनाद्यन्तानन्दस्वरसकरुणाकन्दजनितः
प्रणेतुर्व्यापारः प्रपदनविपाकार्ह उदितः ।
तमाचार्योपज्ञं चिरविरहितस्वात्मघटन-
स्फुरच्छक्तिं षष्ठे मुनिरशरणो याति शरणम् ॥ १३

गुरुद्वारोपेयं स्वयमभिमतं वैरिघटकं
चरित्रैः कर्षन्तं परविघटनं स्वान्वितहरम् ।
निदानं धृत्यादेर्घटकवशभूतिद्वयमगात्
अनर्हद्वैघटयं त्वविकलशरण्यस्थितिमिह ॥ १४

तदेवं षष्ठान्तं विहितसविशेणप्रदनः
फलालाभात् खिन्नस्त्वरितहृदयः सप्तमशते ।
अनिष्टोपन्यासप्रभृतिभिरनिष्टप्रशमने
स्वतःसिध्यच्छीलं प्रभुमभिमुखं समुंखयति ॥ १५

सहन् शाठ्याशङ्कां उपशमितगर्हः प्रकटयन्
स्वगोप्तृत्वं गुप्तिक्रममखिलजन्तुप्रणयिताम् ।
श्रिताक्रन्दच्छेत्ता स्मरणविशदश्चित्रविभवः
स्तुतौ युञ्चन् स्तोतृव्यसनजिददर्शि प्रभुवरः ॥ १६

अथानिष्टान् पुंसां स्वयमुपजिहीर्षन्नपि विभुः
तदिच्छां बाह्येषु प्रशमयितुकामः क्रमवशात् ।
निजेच्छासंसिद्धत्रिविधचिदचिद्वस्तुविततिः
श्रितेच्छावैचित्रीवश इति वदत्यष्टमशते ॥१७

दिदृक्षायां दृश्यः प्रभुरगणि निस्सङ्गसुलभः
स्वविश्लेषे कान्तः श्रितविहितपौष्ल्यविभवः ।
अपेक्षासापेक्षः स्ववितरणस्ज्ञो हृदि रतः
स्वदास्यं तन्निष्ठां तदवधिमपीह प्रकटयन् ॥ १८

अभीष्टं विश्वस्मिन् विषमफलकाङ्क्षिण्यविषमं
प्रयच्छन्तं दृष्ट्वा परमपुरुषोर्थैकरसिकः ।
निरस्तान्यापेक्षो निखिलजगदीशस्य नवमे
निदानं सिद्धीनां निरुपधिकसुहृत्त्वं गणयति ॥ १९
अभाव्येको बन्धुश्चिरकृतदयः शीलजलधिः
स्वसंबन्धात् गोप्ता स्वगुणगरिमस्मारणपरः ।
अशक्यो विस्मर्तुं घटकमुखविस्रंभविषयः
सुमज्ञानिः सिध्द्युन्मुखसमय इच्छन्नवसरम् ॥ २०
उदन्तैरित्येघं निरुपधिकसौहार्दपिशुनैः
उदन्यामुद्वेलामुपजनितवन्तं निजपदे ।
त्रिवर्गातिक्रान्तस्थिरनगरघण्टापथगतेः
सहायीकुर्वाणश्चरमशतके विन्दनि मुनिः ॥ २१
गतिं व्यध्वक्लेशच्छिदमपदशङ्कास्पदरसं
भजद्भिः सुप्रापं विविधभजनप्रक्रियमिह ।
फले तीव्रोद्योगं स्वविषयकृतात्यादरमगात्
यदृच्छातुष्टं सत्सरणिमपुनर्जन्मसयुजम् ॥ २२
परं प्राप्यं पश्यन् परिचरणहेतुं विगणयन्
परिष्कुर्वन्नाज्ञामनितरशरण्यः शरणयन् ।
अनिष्टप्रध्वंसप्रभृतिषु निदानं च कथयन्
मुहुर्देवं लक्ष्म्या सहितमिह भेजे मुनिवरः ॥ २३

पुरा शोकः श्लोकोऽभवदिति नयादित्युपनिब-
न्मुनेः पुण्यश्लोकादजनि परभक्तेः परिणतिः ।
व्यपोह्य स्वं भावं हरिचरणसन्तानकलिकाम्
अविक्षद्योगी यस्तनुमतनुकारुण्यविवशः ॥ २४

सतामित्थं सारं द्रमिडनिगमस्यान्वकथयत्
बहूनां विद्यानां बहुमतिपदं वेङ्कटपतिः ।
दिशासौधश्रेणीदृढघटितजैत्रध्वजपटी-
परामर्शभ्रश्यत्प्रतिमतनिराबाधनिगमः ॥ २५

मनुव्यासप्राचेतसपरिषदर्हा कचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा-
परिभ्रान्ता पङ्कोरुपरि यदि गङ्गा निपतति ॥ २६

इति

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य

श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु

## द्रमिडोपनिषत्सारः

समाप्तः ।

श्रीः ।

# द्रमिडोपनिषदष्टोत्तरशतनामावलिः ।

---

## प्रथमशतकम् ।

| | | |
|---|---|---|
| 1. ओं पराय नमः | உயர்வற உயர்நலம் | 1-1 |
| 2. " निर्वैषम्याय " | வீடுமின் முற்றவும் | 1-2 |
| 3. " सुलभाय " | பத்துடை | 1-3 |
| 4. " अपराधसहनाय " | அஞ்சிறைய | 1-4 |
| 5. " सुशीलाय " | வளவேழுலகு | 1-5 |
| 6. " स्वाराधाय " | பரிவதிலீசனை | 1-6 |
| 7. " सरसभजनाय " | பிறவித்துயரற | 1-7 |
| 8. " स्वार्जवगुणाय " | ஓடும்புள் | 1-8 |
| 9. " सुसात्म्यस्वानन्दप्रदाय " | இவையுமவையும் | 1-9 |
| 10. " अनघविश्राणनपराय " | பொருமாநீள்படை | 1-10 |

## द्वितीयशतकम् ।

| | | |
|---|---|---|
| 11. ओं अतिक्लेशक्षणविरहाय नमः | வாயுந்திரை | 2-1 |
| 12. " उत्तुङ्गललिताय " | திண்ணன் வீடு | 2-2 |
| 13. " मिलत्सर्वास्वादाय " | ஊனில்வாழ் | 2-3 |

| | | |
|---|---|---|
| 14. ओं व्यसनशमनाय नमः | ஆடியாடி | 2-4 |
| 15. " स्वाप्तिमुदिताय " | அந்தாமத்தன்பு | 2-5 |
| 16. " स्ववैमुख्यत्रस्ताय " | வைகுந்தா | 2-6 |
| 17. " स्वजनसुहृदे " | கேசவன் தமர் | 2-7 |
| 18. " मुक्तिरसदाय " | அணைவதரவணை | 2-8 |
| 19. " स्वकैङ्कर्योद्देश्याय " | எம்மாவீடு | 2-9 |
| 20. " सुभगसविधस्थाय " | கிளரொளி | 2-10 |

## तृतीयशतकम् ।

| | | |
|---|---|---|
| 21. ओं अनीदृक्सौन्दर्याय नमः | முடிச்சோதியாய் | 3-1 |
| 22. " तनुविहितसर्गादिसुभगाय " | முந்நீர் ஞாலம் | 3-2 |
| 23. " स्वसेवार्थाकाराय " | ஒழிவில் காலம் | 3-3 |
| 24. " प्रगुणवपुषे " | புகழுநல்லொருவன் | 3-4 |
| 25. " मोहनतनवे " | மொய்ம்மாம்பூம் | 3-5 |
| 26. " लभ्यार्चाविभवाय " | செய்யதாமரை | 3-6 |
| 27. " अतिदास्यावहतनवे " | பயிலும் சுடர் | 3-7 |
| 28. " सदा दृश्याय " | முடியானே | 3-8 |
| 29. " स्तुत्याकृतये " | சொன்னால் | 3-9 |
| 30. " अघविरुद्धाकृतये " | சன்மம் பலபல | 3-10 |

## चतुर्थशतकम् ।

| | | |
|---|---|---|
| 31. ओं स्थिरैश्वर्याय नमः | ஒரு நாயகம் | 4-1 |
| 32. " सहजबहुभोग्याय " | பாலனாய் | 4-2 |
| 33. " मिथःश्लिष्टाय " | கோவைவாயாள் | 4-3 |
| 34. " क्लेशावहसहिततुल्याय " | மண்ணையிருந்து | 4-4 |
| 35. " निजजनं कृतार्थीकुर्वते " | வீற்றிருந்து | 4-5 |

| | | |
|---|---|---|
| 36. ओं प्रणयिभिषजे नमः | தீர்ப்பாரை | 4-6 |
| 37. " सद्बहुगुणाय " | சீலமில்லா | 4-7 |
| 38. " स्वहेयस्त्रोपेक्ष्याय " | ஏறாளும் | 4-8 |
| 39. " स्वमतफलाय " | நண்ணாதார் | 4-9 |
| 40. " उच्चैः स्ववगताय " | ஒன்றுந்தேவும் | 4-10 |

## पञ्चमशतकम् ।

| | | |
|---|---|---|
| 41. ओं दयानिघ्नाय नमः | கையார் சக்கரத்து | 5-1 |
| 42. " भक्तैरघविमथनाय " | பொலிக பொலிக | 5 2 |
| 43. " प्रेमजनकाय " | மாசறுசோதி | 5-3 |
| 44. " जगद्रक्षादीक्षाय " | ஊரெல்லாம் துஞ்சி | 5-4 |
| 45. " स्मृतिजुषे " | எங்ஙனேயோ | 5-5 |
| 46. " अहंभात्रविषयाय " | கடல்ஞாலம் | 5-6 |
| 47. " दीनानां शरण्याय " | நோற்ற நோன்பு | 5-7 |
| 48. " स्वरसकृतदास्याभ्युपगमाय " | ஆராவமுதே | 5-8 |
| 49. " प्राप्ताय " | மானேய்நோக்கு | 5-9 |
| 50. " प्रशङ्कनकृते " | பிறந்தவாறும் | 5-10 |

## षष्ठशतकम् ।

| | | |
|---|---|---|
| 51. ओं गुरुद्वारोपेयाय नमः | வைகல்பூங்கழிவாய் | 6-1 |
| 52. " स्वयमभिमताय " | மின்னிடைமடவார்கள் | 6-2 |
| 53. " वैरिघटकाय " | நல்குரவும் | 6-3 |
| 54. " चरित्रैः कर्षते " | குரவையாய்ச்சியர் | 6-4 |
| 55. " परविघटनाय " | துவளில் | 6-5 |
| 56. " स्वान्वितहराय " | மாலுக்கு | 6-6 |
| 57. " धूत्यादेर्निदानाय " | உண்ணுஞ்சோறு | 6-7 |

| | | |
|---|---|---|
| 58. ओं घट्कवशभूतिद्वयाय नमः | பொன்னுலகு | 6-8 |
| 59. " अनर्हद्वैघट्याय | நீராய் | 6-9 |
| 60. " अविकलशरण्यस्थितये " | உலகமுண்ட | 6-10 |

## सप्तमशतकम् ।

| | | |
|---|---|---|
| 61. ओं शाठ्याशङ्कां सहते नमः | உண்ணிலாவிய | 7-1 |
| 62. " उपशमितगर्हाय " | கங்குலும் பகலும் | 7-2 |
| 63. " स्वगोप्तृत्वं प्रकटयते " | வெள்ளைச் சுரிசங்கு | 7-3 |
| 64. " गुप्तिक्रमं प्रकटयते " | ஆழி யெழ | 7-4 |
| 65. " अखिलजन्तुप्रणयितां [प्रकटयते " | கற்பார் | 7-5 |
| 66. " श्रिताक्रन्दच्छेत्रे " | பாமருமூவுலகும் | 7-6 |
| 67. " स्मरणविशदाय " | ஏழையராவி | 7-7 |
| 68. " चित्रविभवाय " | மாயாவாமனனே | 7-8 |
| 69. " स्तुतौ युञ्जते " | என்றைக்கும் | 7-9 |
| 70. " स्तोत्रव्यसनजिते " | இன்பம் பயக்க | 7-10 |

## अष्टमशतकम् ।

| | | |
|---|---|---|
| 71. ओं द्विदक्षायां दृश्याय नमः | தேவிமாராவார் | 8-1 |
| 72. " निस्सङ्गसुलभाय " | நங்கள்வரிவளை | 8-2 |
| 73. " स्वविश्लेषे कान्ताय " | அங்குமிங்கும் | 8-3 |
| 74. " श्रितविहितपौष्कल्यविभवाय " | வார்கடாவருவி | 8-4 |
| 75. " अपेक्षासापेक्षाय " | மாயக் கூத்தா | 8-5 |
| 76. " स्ववितरणसज्जाय " | எல்லியும் | 8-6 |
| 77. " हृदि रताय " | இருத்தும் வியந்து | 8-7 |
| 78. " स्वदास्यं प्रकटयते " | கண்கள் சிவந்து | 8-8 |

| | | |
|---|---|---|
| 79. ओं स्वदास्यनिष्ठां प्रकटयते नमः | கருமாணிக்கம் | 8-9 |
| 80. " स्वदास्यावधिं प्रकटयते " | நெடுமாற்கடிமை | 8-10 |

## नवमशतकम् ।

| | | |
|---|---|---|
| 81. ओं एकबन्धवे नमः | கொண்ட பெண்டிர் | 9-1 |
| 82. " चिरकृतदयाय " | பண்டை நாளாலே | 9-2 |
| 83. " शीलजलधये " | ஓராயிரமாய் | 9-3 |
| 84. " स्वसंबन्धात् गोप्त्रे " | மையார்கருங் | 9-4 |
| 85. " स्वगुणगरिमस्मारणपराय " | இன்னுயிர்ச்சேவல் | 9-5 |
| 86. " विस्मर्तुम् अशक्याय " | உருகுமால் | 9-6 |
| 87. " घटकमुखविस्रंभविषयाय " | எங்கானல் | 9-7 |
| 88. " सुमज्ञानये " | அறுக்கும் வினை | 9-8 |
| 89. " स्निग्धमुखसमयाय " | மல்லிகை | 9-9 |
| 90. " अवसरम् इच्छते " | மாலைநண்ணி | 9-10 |

## दशमशतकम् ।

| | | |
|---|---|---|
| 91. ओं गतये नमः | தாளதாமரை | 10-1 |
| 92. " व्यध्वक्लेशच्छिदे " | கெடுமிடர் | 10-2 |
| 93. " अपदशङ्कास्पदरसाय " | வேய்மருதோள் | 10-3 |
| 94. " भजद्भिः सुप्रापाय " | சார்வே தவநெறி | 10-4 |
| 95. " विविधभजनप्रक्रियाय " | கண்ணன் கழலிணை | 10-5 |
| 96. " फले तीव्रोद्योगाय " | அருள் பெறுவார் | 10-6 |
| 97. " स्वविषयकृतात्यादराय " | செஞ்சொற்கவிகாள் | 10-7 |
| 98. " यदृच्छातुष्टाय " | திருமாலிருஞ்சோலை | 10-8 |
| 99. " सत्सरणये " | சூழ்விசும்பு | 10-9 |
| 100. " अपुनर्जन्मसयुजे " | முனியே | 10-10 |

श्रीः

# द्रमिडोपनिषत्तात्पर्यरत्नावलिः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयम् ।
सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम् ॥

## अवतारिका

सारः सारस्वतानां शठरिपुफणितिः शान्तिशुद्धान्तसीमा
मायामायामिनीभिः स्वगुणविततिभिर्बन्धयन्तीं धयन्ती ।
पारं पारंपरीतो भवजलधिभवन्मज्जनानां जनानां
प्रत्यक् प्रत्यक्षयेन्नः प्रतिनियतरमासन्निधानं निधानम् ॥ १

प्रज्ञाख्ये मन्थशैले प्रथितगुणरुचिं नेत्रयन् संप्रदायं
तत्तल्लब्धिप्रसक्तैरनुपधिविबुधैरर्थितो वेङ्कटेशः ।
तल्पं कल्पान्तयूनः शठजिदुपनिषद्दुग्धसिन्धुं विमथ्नन्
ग्रश्नाति स्वादुगाथालहरिदशशतीनिर्गतं रत्नजातम् ॥ २

पाञ्चालीगात्रशोभाहृतहृदयवधूवर्गपुंभावनीत्या
पत्यौ पद्मासहाये प्रणयिनि भजतः प्रेयसीपारतन्त्र्यम् ।
भक्तिः शृङ्गारवृत्त्या परिणमति मुनेर्भावबन्धप्रथिम्ना
योगात् प्रागुत्तरावस्थितिरिह विरहो देशिकास्तत्र दूताः ॥ ३

भाषागीतिः प्रशस्ता भगवति वचनात् राजवच्चोपचारात्
सा चागस्त्यप्रसूता त्विति परिजगृहे भूमिकाभेदयोग्या ।
यत्तत्कृत्यं श्रुतीनां मुनिगणविहितैः सेतिहासैः पुराणैः
तत्रासौ सत्त्वसीम्नः शठमथनमुनेः संहिता सार्वभौमी ॥ ४

आदौ शारीरकार्थक्रममिह विशदं विंशतिर्वक्ति साग्रा
संक्षेपोऽसौ विभागं प्रथयति च ऋचां चारुपाठोपपन्नम् ।
सम्यग्गीतानुबद्धं सकलमनुगतं सामशाखासहस्रं
संलक्ष्यं साभिधेयैर्यजुरपि दशकैर्भात्यथर्वा रसैश्च ॥ ५

प्राच्ये सेवानुगुण्यात् प्रभुमिह शतकेऽमंस्त मुक्तेरुपायं
मुक्तप्राप्यं द्वितीये मुनिरनुबुबुधे भोग्यताविस्तरेण ।
प्राप्यत्वोपायभावौ शुभसुभगतनोरित्यवादीत् तृतीयेऽ
नन्यप्राप्यश्चतुर्थे समभवदितरैरप्यनन्याद्युपायः ॥ ६

देवः श्रीमान् स्वसिद्धेः करणमिति वदन्नेकमर्थं सहस्रे
सेव्यत्वादीन् दशार्थान्पृथगिह शतकैर्वक्ति तत्स्थापनार्थान् ।
एकैकस्यात् परत्वादिषु दशकगुणेष्वायतन्ते तथा ते
तत्तद्गाथागुणानामनुविदधति तत्पङ्क्तयः पङ्क्तिसंख्याः ॥ ७

सेव्यत्वात् भोग्यभावात् शुभतनुविभवात् सर्वभोग्याधिकत्वात्
श्रेयस्तद्धेतुदानात् श्रितविवशतया स्वाश्रितानिष्टहृत्त्वात् ।
भक्तच्छन्दानुवृत्तेः निरुपधिकसुहृद्भावतः सत्पदव्यां
साहाय्याच्च स्वसिद्धेः स्वयमिह करणं श्रीधरः प्रत्यपादि ॥ ८

ब्रूते गाथासहस्रं मुरमथनगुणस्तोमगर्भं मुनीन्द्रः
प्रत्येकं चात्र गाथाः प्रथितविभुगुणाः स्पष्टमध्यक्षयामः ।
तत्रासङ्कीर्णतत्तद्दशकगुणशतस्थापनौचित्ययुक्तान्
पेदंपर्यावरुद्धानगणितगुणितान् तद्गुणान् उद्गृणीमः ॥ ९

इच्छासारथ्यसत्यापितगुणकमलाकान्तगीतान्तसिद्ध-
च्छुद्धान्ताचारशुद्धैरियमनघगुणग्रन्थिबन्धानुबद्धा ।
तत्ताहक्ताम्रपर्णीतटगतशठजिद्दृष्टसर्वीयशाखा-
गाथातात्पर्यरत्नावलिरखिलभयोत्तारिणी धारणीया ॥ १०

इति अवतारिका

श्रीः ॥

## முதல் பத்து

முதல் திருவாய்மொழி — உயர்வற உயர்நலம்

निस्सीमोद्यद्गुणत्वात् अमितरसतयाऽनन्तलीलास्पदत्वात्
स्वायत्ताशेषसत्तास्थितियतनभिदावैभवात् वैश्वरूप्यात् ॥
त्र्यक्षब्रह्मात्मभावात् सदसदवगतेः सर्वतत्त्वेषु पूर्तेः
पश्यन् योगी परं तत्पदकमलनतावन्वशादात्मचित्तम् ॥ ११

இரண்டாம் திருவாய்மொழி — வீடுமின் முற்றவும்

स्वामित्वात् सुस्थिरत्वात् निखिलनिरुपधिस्वात्मविद्ग्राह्यभावात्
तादृक्सर्वानुकूल्यात् च्यवनवदितरप्राप्यवैषम्यवत्त्वात् ।
सर्वत्रापक्षपातात् शुभविभवतया मानसाद्यर्च्यभावात्
सङ्कोचोन्मोचकत्वात् जगदयनतयोपादिशत्सर्वयोग्यम् ॥ १२

மூன்றாம் திருவாய்மொழி — பத்துடையடியவர்

बन्धार्हत्वात् स्वभक्तैरधिकतरगुणानन्तदिव्यावतारात्
सर्वेष्वासक्तिमत्त्वात् नतसुगमतया स्वप्रबोधप्रदत्वात् ।
ख्याताभिख्यादिचिह्नात् स्वरुचिवितरणात् सर्वकालाश्रयत्वान्
शर्वादिः स्वाङ्गदानात् प्रहितपदतयाऽनन्तसौलभ्यमाह ॥ १३

நான்காம் திருவாய்மொழி — அஞ்சிறையமடநாராய்

त्राणे बद्धध्वजत्वात् शुभनयनतया स्वार्थलाभेऽर्थिभावात्
तिम्यन्मेघस्वभावात् जगदुपजननस्थापनातिप्रियत्वात् ।
कारुण्यात्तत्वयोगादनुगतमहिषीसन्निधेः सङ्गदैर्घ्यात्
नानाबन्धैः स्वरक्षावहिततमतया क्षाम्यतीत्याह कृष्णम् ॥ १४

सध्रीभव्यान् सुवाचः सुचरितसुभगान् कृष्णसारूप्यसौम्यान्
स्वाहारोदारशीलान् तनुधृतभगवल्लक्ष्मणो बाल्यगुप्तान् ।
छात्रस्वच्छन्दवृत्तीनभिगतशिशिरानन्तरङ्गोक्तियोग्यान्
आचार्यान् कृष्णलब्धाववृणुत शठजित् प्रेयसीदूतनीत्या ॥ १५

ஐந்தாம் திருவாய்மொழி — வளவேழுலகின் முதலாய

मुग्धाह्वानाभिमुख्यात् निजमहिमतिरस्कारकार्चाप्रियत्वात्
सर्वत्राप्यङ्घ्रिदानात् सविधशयनतः स्वाङ्घ्रिसक्तैकरस्यात् ।
गोपाद्यासेरशेषेक्षणविषयतय भक्तवस्तुप्रसक्तेः
श्लिष्यच्चाशाव्यपोहात् तदहितशमनात् प्राह नाथं सुशीलम् ॥ १६

ஆறாம் திருவாய்மொழி — பரிவதில்ஈசனை

अप्रीतेरर्च्यभावात् अनियतविविधाभ्यर्चनात् अल्पतुष्टेः
प्रह्वावर्ज्येशभावात् स्वविषयनियतेष्वादरात् स्वादुभूम्ना ।
पादासक्तप्रसक्तेः सकृदुपसदने मोक्षणात् धर्मसौस्थ्यात्
क्षिप्रक्षिप्ताहितत्वात् सुकरभजनतां माधवस्याभ्यधत्त ॥ १७

ஏழாம் திருவாய்மொழி — பிறவித்துயரற

सच्चित्ताकर्षहेतोरघशमननिधेर्नित्यभोग्यामृतस्य
त्यागे हेतूज्झितस्य प्रवहदुपकृतेर्दुस्त्यजस्वानुभूतेः ।
त्यागाकाङ्क्षानिराद्धुः श्रितहृदयपृथक्कारनित्याक्षमस्य
स्वात्माश्लिष्टस्य गाथक्रमहृदयशसः सेवनं स्वाद्ववोचत् ॥ १८

எட்டாம் திருவாய்மொழி — ஓடும் புள்ளேறி

सूरीणां स्वैरसेव्ये स्वयमवतरति क्षुद्रदिव्यैकनेत्रे
गोपाद्यर्थं धृताद्रौ श्रिततनुरसिके वामनीभावदृश्ये ।
सच्चित्तानन्यवृत्तौ विभवसमतनौ स्वायुधारूढहस्ते
नीचोच्चग्राह्यपादे निरुपधिमृजुतां नीरवर्णे जगाद ॥ १९

ஒன்பதாம் திருவாய்மொழி — இவையுமவையும்

पर्यन्तेऽल्के च दृष्टं स्वविरहविधुरं डिम्भवत्पार्श्वलीनं
चित्ते क्लृप्तप्रवेशं भुजशिखरगतं तालुसिंहासनस्थम् ।
चक्षुर्मध्ये निविष्टं स्थितमलिकतटे मस्तके तस्थिवांसं
प्रत्याहारोक्तरीत्या विभुमनुबुभुजे सात्म्यभोगप्रदानात् ॥ २०

பத்தாம் திருவாய்மொழி — பொருமாநீள்படை

विष्वग्विक्रान्तिदृश्यं विगणनसुलभं व्यक्तपूर्वोपकारं
स्वान्तस्यैकाग्र्यहेतुं स्वयमुदयजुषं बन्धमात्रोपयातम् ।
चिन्तास्तुत्यादिलक्ष्यं नतजनसततश्लेषिणं दर्शितार्चं
स्मृत्यै चित्ते मिषन्तं स्ववितरणमहौदार्यतुष्टोऽभ्यचष्ट ॥ २१

आदावित्थं परत्वात् अखिलसमतया भक्तसौलभ्यभूम्ना
निश्शेषागस्सहत्वात् कृपणसुघटनाच्छक्यसंराधनत्वात् ।
स्वादुस्वोपासनत्वात् प्रकृतिऋजुतया सात्म्यभोगप्रदत्वात्
अव्याजोदारभावादमनुत शतके माधवं सेवनीयम् ॥ (शतकं 1)२२

## இரண்டாம் பத்து

### முதல் திருவாய்மொழி — வாயுந்திரையுகளும்

निद्राविच्छेदकत्वात् अरतिजननतोऽजस्रसंक्षोभकत्वात्
अन्वेष्टुं प्रेरकत्वात् विलपवितरणात् कार्श्यदैन्यादिकृत्त्वात् ।
निन्दाक्षेपादिसंज्ञीकरणत उपसंशोषणावर्जनाभ्यां
रम्यास्वादस्य शौरेः क्षणविरहदशादुस्सहत्वं जगाद ॥ २३

### இரண்டாம் திருவாய்மொழி — திண்ணன் வீடு

पूर्णैश्वर्यावतारं भवदुरितहरं वामनत्वे महान्तं
नाभीपद्मोत्थविश्वं तदनुगुणदशं कल्पतल्पीकृताब्धिम् ।
मुग्धं न्यग्रोधपत्रे जगदवनधियं रक्षणायावतीर्णं
रुद्रादिस्तुत्यलीलं व्यवृणुत ललितोत्तुङ्गभावेन नाथम् ॥ २४

### மூன்றாம் திருவாய்மொழி — ஊனில் வாழுயிரே

मित्रास्वादानुभूतिं प्रियमुपकृतिभिः दास्यसारस्यहेतुं
स्वात्मन्यासार्हकृत्यं भजदमृतरसं भक्तचित्तैकभोग्यम् ।
सर्वाक्षप्रीणनार्हं सपदि बहुफलस्नेहमास्वाद्यशीलं
सभ्यैः साध्यैः समेतं निरविशदनघाशेषनिर्वेशमीशम् ॥ २५

### நான்காம் திருவாய்மொழி — ஆடியாடி

प्रह्लादार्थं नृसिंहं क्षपितविपदुषावल्लभं क्षिप्तलङ्कं
मल्लप्रत्यर्थिकेतुं श्रमहरतुलसीमालिनं धैर्यहेतुम् ।
प्राणं दत्तावधानं स्वरिपुहतिकृताश्वासनं दीप्तहेतिं
सत्प्रेक्षारक्षितारं व्यसननिरसनव्यक्तकीर्तिं जगाद ॥ २६

ஐந்தாம் திருவாய்மொழி — அந்தாமத்தன்பு

स्वप्राप्त्या सिद्धकान्तिं सुघटितदयितं विस्फुरत्तुङ्गमूर्तिं
प्रीत्युन्मेषातिभोग्यं नवघनसरसं नैकभूषादिहृद्यम् ।
प्रख्यातप्रीतिलीलं दुरभिलपरसं सद्गुणामोदहृद्यं
विश्वव्यावृत्तचित्रं व्रजयुवतिगणख्यातरीत्याऽन्वभुङ्क्त ॥ २७

ஆறும் திருவாய்மொழி — வைகுந்தா

स्वास्वादख्यापकत्वात् श्रितनियतदृशेः नैकभोगप्रदानात्
त्यागानर्हप्रकाशात् स्थिरपरिचरणस्थापनात् पापभङ्गात् ।
दुस्साधार्थस्य सिद्धेर्विरहभयकृतेः दुर्विभेदात्मयोगात्
नित्यानेकोपकारात् स्वविरहचकितं प्रैक्षताम्भोरुहाक्षम् ॥ २८

ஏழாம் திருவாய்மொழி — கேசவன் தமர்

सर्वादिः सर्वनाथस्त्रिभुवनजननीवल्लभः स्वाश्रितार्थी
विष्वग्व्याप्त्याऽतिदीप्तो विमतनिरसनः स्वाङ्घ्रिसद्भक्तिदायी ।
विश्वाप्त्यै वामनाङ्गः स्वविभवरसदः स्वान्तनिर्वाहयोग्यः
स्वार्थेहो बन्धमोक्ता स्वजनहिततया द्वादशाख्याभिरूचे ॥ २९

எட்டாம் திருவாய்மொழி — அணைவதரவணை

प्राप्याकारोपपत्त्या जनिपरिहरणात् विश्वसृष्ट्यादिशक्तेः
निस्सीमानन्ददेशान्वयत उपजगौ रक्षणार्थावतारात् ।
सुप्रख्यातानुभावाद्विविधविहरणाद्याप्तिवैचित्र्यवत्त्वात्
भक्तैर्द्राग्दृश्यभावादखिलफलकृतेर्मुक्तिसौख्यं मुकुन्दे ॥ ३०

### ஒன்பதாம் திருவாய்மொழி — எம்மாவீட்டுத் திறமும்

[illegible]ाङ्ग्रियोगं शुभमतिकरदं स्तोत्रसामर्थ्यहेतुं
[illegible]कारोपकारं स्मृतिरसशमितान्यादरं प्रीतिवश्यम् ।
[illegible]लक्ष्मत्वप्रदममृतरसध्यानमात्मार्पणार्हं
[illegible]आहारयन्तं वृतपरिचरणं चक्रपाणिं जगाद ॥ ३१

### பத்தாம் திருவாய்மொழி — கிளரொளியிளமை

[illegible]स्वभावं मुखरितजलजं वर्धुकाम्भोदवर्णं
[illegible]त्राभिगुप्ताश्रितमतिविलसद्धेतिमापीतगव्यम् ।
[illegible]न्क्षिप्तभूमिं प्रणमदनुगुणं पूतनाचेतनान्तं
[illegible]चार्यं श्रुतीनां शुभसविधगिरिस्थानतो निर्विवेश ॥ ३२

[illegible]नान्यसहाक्षणविरहतया मानुषत्वे परत्वात्
[illegible]स्वादत्वभूम्ना व्यसनहरतया स्वाप्तिसम्प्रीतिमत्त्वात् ।
[illegible]आलयोगान्निजसुहृदवनान्मुक्तिसारस्यदानात्
[illegible]र्दिश्यभावाच्छुभनिलयतया [illegible]तिभोग्यं द्वितीये ॥ (शतकं 2)

---

## மூன்றாம் பத்து

### முதல் திருவாய்மொழி — முடிச்சோதியாய்

[illegible]णकल्पमङ्गैः अनुपमसुषमं वक्ति निस्सीमदीप्तं
[illegible]न्तस्वादुस्वदेहं सुखभजनपदं मण्डिताङ्गं महिम्ना ।
[illegible]आनिक्रान्तकीर्तिं मलिनिमरहितौज्ज्वल्यमिष्टौपवाह्यं
[illegible]नाश्चर्यत्रिणेत्रप्रभृतिसुरनुतिं चित्रसौन्दर्यविद्धम् ॥ ३४

இரண்டாம் திருவாய்மொழி — மூன்றில் ஞாலம்

स्रष्टा क्रान्ता च लोकान् हृतधरणिभरोऽनन्यभोग्याङ्घ्रियुग्मः
चित्तोद्यच्छीलरूपो निरवधिरसदस्वाङ्घ्रिरध्यक्षमूर्तिः ।
नित्योपास्यस्त्वपादो निखिलवसुमतीगोपनस्वाङ्घ्रिवृत्तिः
मुष्णन्मूर्तिप्रतीत्या यमपरवशतां प्रैक्षि लोकैकनाथः ॥ ३५

மூன்றாம் திருவாய்மொழி — ஒழிவில் காலமெல்லாம்

स्थानोत्कर्षात् सुदीप्तं श्रमहरवपुषं स्वाङ्गदर्याप्तभूषं
तेजिष्ठं नीचयोगात् प्रणमितभुवनं पावनं सन्नतानाम् ।
प्राप्त्यर्हस्थानमंहःप्रशमनविषयं बन्धविच्छेदिपादं
भेजे शीघ्राभियानक्षमशुभवसतिं लम्भितार्चाभिमुख्यः ॥ ३६

நான்காம் திருவாய்மொழி — புகழுநல்லொருவன்

भूतैस्तत्कार्यभूतैः शुभनिजवपुषा दीप्तिमद्भिः पदार्थैः
पथ्यास्वादोपपन्नैः श्रुतिमुखसुभगाशेषशब्दप्रपञ्चैः ।
नानाकारैः पुमर्थैः जगदधिपतिभिश्चेतनाचेतनौघैः
जुष्टं दोषैरदुष्टं निखिलतनुतया संप्रतुष्टाव तुष्टः ॥ ३७

ஐந்தாம் திருவாய்மொழி — மொய்ம்மாம்பூம்பொழில்

ग्राहग्रस्तेभमोक्षे सुररिपुदमने गोकुलत्राणकार्ये
(नीला) गोदार्थोक्षावमर्दे सदहितमथने सिन्धुपर्यङ्कयोगे ।
क्षोणीभारव्यपोहे क्षितिधरवसतौ निर्जराराध्यतायां
विश्वारम्भे च शौरेः शुभतनुसुषमोन्मादकत्वं जगाद ॥ ३८

ஆறாம் திருவாய்மொழி — செய்யதாமரை

पद्माक्षीं पापहन्त्रीं मणिरुचिममराधीशचिन्त्याङ्घ्रिपद्मां
तत्तादृक्कुन्तलश्रीसुघटितमकुटां भावुकप्राप्यपादाम् ।
शुद्धास्वाद्यस्वभावां यमभटमथनीं भक्तधीवृत्तिभाव्यां
नीचोच्चाभीष्टवृत्तिं हरितनुमवदन्निर्मलार्चानुरक्तः ॥ ३९

ஏழாம் திருவாய்மொழி — பயிலும் சுடரொளி

स्फीतालोकातिभूम्ना पृथुबहुभुजया दिव्यमाल्यास्त्रभाजा
सद्वस्त्राकल्पक्लृप्त्या त्रिदशरसकृता रक्षणौन्मुख्यवत्या ।
मुक्तैरुत्तंसिताङ्घ्र्या स्थिरधृतरमया श्यामया नित्यसत्या
शौरेः कान्त्या जितानां स्वबहुमतजनस्वामितामन्वमंस्त ॥ ४०

எட்டாம் திருவாய்மொழி — முடியானே மூவுலகும்

चित्ताकृष्टिप्रवीणैरभिलपनसुखैः स्पर्शवाञ्छां दुहानैः
आतन्वानैर्दिदृक्षां श्रुतिहितसहितैरात्मनित्यादरार्हैः ।
विश्लेषाक्रोशकृद्भिः स्मरदरतिकरैर्दत्तसायुज्यसङ्गैः
कुर्वाणैर्बाललौल्यं मिलितगुणगणैः नित्यदृश्याङ्गमाह ॥ ४१

ஒன்பதாம் திருவாய்மொழி — சொன்னால் விரோதம்

रम्यस्थानादियोगादमितविभवतः सत्पथप्रापकत्वात्
सम्यक्सायुज्यदानात् अनघवितरणात् सर्वशेषित्वचिह्नात् ।
प्रख्याताख्यासहस्रैरवतरणरसैः भुक्तिमुक्त्याभिमुख्यात्
त्रैलोक्योत्पादनाच्च स्तुतिविषयतनुं व्याहरन्निन्दितान्यः ॥ ४२

பத்தாம் திருவாய்மொழி — சன்மம் பல பல

प्रादुर्भावानुभावात् परिजनविभवात् पात्रनालङ्क्रियत्वात्
जैत्रव्यापारयोगात् अघटितघटनात् देवभावप्रसिद्धेः ।
आश्चर्यक्रीडनत्वात् सरसिजनिलयानन्दनात् छन्दवृत्तेः
ऐश्वर्यव्यक्तिमत्त्वादघशमनतनुं केशवं व्याजहार ॥ ४३

एवं सौन्दर्यभूम्ना तनुविहितजगत्कृत्यसौभाग्ययोगात्
स्वेच्छासेव्याकृतित्वात् निखिलतनुतयोन्माददानार्हकान्त्या ।
लभ्यार्चावैभवत्वात् गुणरसिकगुणोत्कर्षणादक्षकृष्ट्या
स्तुत्यत्वात् पापभङ्गाच्छुभसुभगतनुं प्राह नाथं तृतीये ॥ (शतकं 3)

---

## நான்காம் பத்து

முதல் திருவாய்மொழி — ஒரு நாயகமாய்

श्रीमान्नारायणः स्वाम्यनुगुणमकुटो वीरदामाङ्कमौलिः
दुर्दान्तारातिहन्ताऽद्भुतनियततनुः कल्पपाथोधितल्पः ।
विश्वाद्यं ज्योतिरुर्वीधरफणिशयनो वेदरूपस्वकेतुः
निर्धूताशेषदोषः प्रभुरथ कथितः सुस्थिरैश्वर्यसीमा ॥ ४५

இரண்டாம் திருவாய்மொழி — பாலனாய் ஏழுலகு

शैत्यात् सौगन्ध्यभूम्ना रुचिरुचिरतया पोषणादाभिरूप्यात्
सन्दर्भात् पुष्पसङ्गान्महिततुलसिकामालया शङ्कतश्च ।
चक्राधीशस्य योगाद्वटदलशयनाद्यर्हणीयापदानैः
सम्पन्नानेकभोग्यं निरविशदजितं कृष्णमूर्तिं शठारिः ॥ ४६

...ன்றாம் திருவாய்மொழி — கோவைவாயாள் பொருட்டு

...ोगन्धानुलेपः स्तुतिवचनकृतस्रक्पटोऽञ्जल्युपात्ता-
...ङ्कारः प्राणवासी कलितवरशिरोभूषणश्चेतनेन ।
...र्णा सत्पादपीठः स्वतनुसदनतामात्मरूपे वितन्वन्
अन्योन्यात्मत्वयोगात् प्रभुरगणि मिथःश्लिष्टभावोऽथ तेन ॥ ४७

...ான்காம் திருவாய்மொழி — மண்ணையிருந்து துழாவி

...म्याद्यैः सागराद्यैः ज्वलनशशिमुखैः वस्तुभिर्वत्सपूर्वैः
नृत्यद्भिः स्वैश्च लोकादिभिरथ पृथिवीक्षिद्भिरात्मीयदासैः ।
...लभ्यैश्वर्यवर्गैरपि च गुणगणैः वासुदेवो वियोगे
स्वीयैस्तुल्यैश्च भक्तान् व्यथयति मधुहेत्यब्रवीत् कारिसूनुः ॥ ४८

ஐந்தாம் திருவாய்மொழி — வீற்றிருந்து ஏழுலகும்

आपन्नानन्यबन्धौ सरसिजनिलयावल्लभे सान्द्रमोदे
भक्ताघध्वंसशीले तदुचितसमयाश्वासदानप्रवीणे ।
...र्पूरालेपशोभे समधिकरहिते तोषके सर्वपूर्णे
कृष्णे स्तुत्यादिभाजां शठरिपुरवदत् धन्यतां निन्दितान्यः ॥ ४९

ஆறாம் திருவாய்மொழி — தீர்ப்பாரை யாம் இனி

...च्छासारथ्ययोगात् प्रहरणवनाच्छ्रीतुलस्याढ्यमौलेः
स्तुत्याङ्घ्र्योः पादधूल्या स्वजनभजनतत्पादधूलीनमोभिः ।
...न्मूलस्वाङ्घ्रिनुत्या तदितरभजनत्यागपूर्वोपसत्त्या
...मेवं प्राचिख्यपत् स्वप्रणयिषु भिषजं केसरस्रग्विभूषः ॥ ५०

ஏழாம் திருவாய்மொழி — சீலமில்லாச் சிறியனேலும்

आपद्बन्धुत्वदीप्तं निरवधिकमहानन्ददं कान्तलोकं
दुर्दर्शं देवतानां पितरमनुपधिं सर्वभूतान्तरस्थम् ।
पूर्णज्ञानैकमूर्तिं धृतशुभतुलसिं चक्रनाथं श्रुतीनां
विश्रान्तिस्थानमीशं विशदबहुगुणं प्राह खिन्नः शठारिः ॥ ५१

दुश्शीलो मांसचक्षुः निरवधिदुरितो वीतलज्जो विलोलः
प्रेक्षाहीनोऽन्यसङ्गात् कृतमपि लघयन् शीलमन्तर्दधानः ।
कर्मज्ञानादिशून्यो निरुपधिविहितां ज्ञानदृष्टिं विनिन्दन्
प्रख्याप्यैवं स्वदोषान् पतिगुणरसिकः तद्दिदृक्षां चचक्षे ॥ ५२

எட்டாம் திருவாய்மொழி — ஏறாளும் இறையோனும்

सौन्दर्यादौ स्वकीये हृदि च खनिकरे पूर्णतायां च कान्तौ
सम्यग्ज्ञाने प्रकाशे वलयरशनयोर्वर्ष्मणि स्वस्वरूपे ।
स्याद्विष्णोर्यद्युपेक्षा तदिदमखिलमुन्मूलनीयं तदीयैः
इत्यूचे कारिसूनुः तदुपरि कथयंस्तं शिवाद्याश्रिताङ्गम् ॥ ५३

ஒன்பதாம் திருவாய்மொழி — நண்ணாதார் முறுவலிப்ப

कारुण्यादब्धिमाथी तदुपरि शयितः तत्समानाङ्गवर्णः
ख्यातौदार्यः स्वदाने रुचिरमणिरुचिः वेषतोऽतीव भोग्यः ।
आत्मत्वेनानुभाव्यो दुरधिगमपदो बन्धमोक्षस्वतन्त्रः
स्वान्यप्रेमोपरोधी स्वदत इह विभुः तत्पदोत्कण्ठिताय ॥ ५४

नानाः संबन्धिदुःखैः स्वविभवमरणैः तापकृद्भोग्यसङ्गैः
(ग)न्याज्ञातिवृत्तेः अनितरविधुतेरण्डकारानिरोधात् ।
मर्त्यभावोज्झितत्वात् प्रलघुसुखपरिष्वङ्गतश्चातिशोच्यं
विश्वं द्रष्टुं न शक्तो निजपदनयने नाथति स्म स्वनाथम् ॥ ५५

स्थानां निर्वाहकत्वात् अहिपतिशयनादब्धिवर्णस्वभावात्
अत्यन्तोदारभावात् बलभिदुपलवद्दर्शनीयत्वयोगात् ।
(तु)लसिकात्वात् तुलस्या प्रियकरणमुखैरण्डसृष्टौ पटुत्वात्
सुप्रापत्वादिभिः तं फलमतुलमवैक्षुजुषामेष नाथम् ॥ ५६

பத்தாம் திருவாய்மொழி — ஒன்றும் தேவும்

कल्पान्तेऽपि स्थितत्वात् सकलसुरगणस्रष्टृभावाज्जनानां
(र)क्षाव्यापादकत्वात् शिवविधिभरणात् सर्वदेवात्मभावात् ।
तत्तत्कर्मानुरूपं फलवितरणतो वैनतेयध्वजत्वात्
मार्कण्डेयावनादेः प्रभुमथ शठजित् प्राह सर्वामरोच्चम् ॥ ५७

नित्यैश्वर्यं तु तुर्ये सहजबहुलसद्भोग्यमन्योन्यसक्तं
(प्र)ाणापादिस्वतुल्यं स्वजनकृतकृतार्थीकृतिं स्नेहवेद्यम् ।
संपूर्णं सद्गुणौघैः स्वजनपरिहृतोपेक्ष्यमिष्टार्थरूपं
प्राह निःशेषभोग्यादमनुत शतके देवतासार्वभौमम् ॥ (शतकं 4)

## ஐந்தாம் பத்து

### முதல் திருவாய்மொழி — கையார்சக்கரத்து

चक्रस्फायत्करत्वात् स्वजनवशतया रक्षणोद्युक्तभावात्
भव्यत्वात् स्वात्मदानात् अमलतनुतया श्रीगजेन्द्रावनाच्च ।
नानाबन्धुत्वयोगात् विपदि सखितया व्याजमात्राभिलाषात्
कारुण्याधीनवृत्तिं कमलदृशमवैत् कारिसूनुः कृतार्थः ॥ ५९

### இரண்டாம் திருவாய்மொழி — பொலிக பொலிக

पाथोधिप्रौढकान्तौ सरसतुलसिकालङ्कृतौ दातृभावे
वैकुण्ठत्वेच चक्रप्रहरणवशितादेवतास्थापनादौ ।
स्वानामच्यावनादौ सकलनियमने सर्वकर्मैज्यभावे
नित्यासक्तैः स्वभक्तैः जगदघशमनं प्राह कृष्णं शठारिः ॥ ६०

### மூன்றாம் திருவாய்மொழி — மாசறு சோதி

ज्योतीरूपाङ्गकत्वात् सरसिजनयनानिष्टविध्वंसकत्वात्
मेघौघश्यामलत्वात् श्रितसरसतयोत्कृष्टसौलभ्ययोगात् ।
रक्षायां सावधानात् सुभगतनुतया सोपकारास्रवत्त्वात्
स्वानां प्रेमातिमात्रं जनयति भगवानित्यवादीत् शठारिः ॥ ६१

### நான்காம் திருவாய்மொழி — ஊரெல்லாம் துஞ்சி

आपद्बन्धुत्वकीर्त्या यदुकुलजननात् धीरवीरत्वकीर्त्या
लोकानां विक्रमाच्चाश्रितदुरितहृतेरद्भुतैश्चेष्टितैश्च ।
चक्राद्यस्त्रान्वितत्वात् कमलनयनतासंपदा वामनत्वात्
क्षीराब्धौ शेषशायी जगदवनमहादीक्षितोऽध्यायि तेन ॥ ६२

ஐந்தாம் திருவாய்மொழி — எங்ஙனேயோ அன்னைமீர்காள்

शङ्खाद्यैः यज्ञसूत्रादिभिरपि च तथा शार्ङ्गमुख्यैः तुलस्या
बिम्बोष्ठाद्यैः सुनासाव्रततिनिरवधिद्योतिरूर्जस्विमूर्त्या ।
नेत्राब्जाद्यैरशेषाभरणसुषमया स्वैश्च भक्तैर्मनोज्ञो
देवः स्वानामजस्रं स्मृतिविषयतया भाति चेत्यभ्यधायि ॥ ६३

ஆறாம் திருவாய்மொழி — கடல்ஞாலம் செய்தேனும்

पृथ्व्याद्यैः जगत्याः सकलविधकलेवर्तकत्वेन भूता-
न्तर्यामित्वेन कृत्युद्धरण (भ) परतया भूभरापाकृतेश्च ।
शैलेन्द्रोद्धारणाद्यैः स्वजनहिततया ब्रह्मरुद्रेन्द्रभावात्
दुष्कर्मोन्मूलनाद्यैः प्रभुरनिशमहंबुद्धिबोध्योऽन्वभावि ॥ ६४

ஏழாம் திருவாய்மொழி — நோற்ற நோன்பிலேன்

सर्पाधीशेशयत्वात् अरिदरभरणात् सानुकम्पत्वयोगात्
स्वस्साहाय्यादशेषान्तरनिलयतया भूसमुद्धृत्युदन्तैः ।
सर्वेषां तातभावात् इतरजनदुराधर्षतादेः शरण्यं
दीनानां प्राह विष्णुं शठजनमथनो देवतासार्वभौमम् ॥ ६५

எட்டாம் திருவாய்மொழி — ஆராவமுதே

निस्सौहित्यामृतत्वात् स्ववशजनितयाऽनन्यभावप्रदानात्
मर्यादातीतकीर्त्या नलिननयनतो नायकत्वात् सुराणाम् ।
स्थैर्यप्रष्ठ्यादियोगात् अनितरगतितायावहासन्नभावात्
दास्ये स्वे स्थापयेत् स्वान् हरिरिति शठजित् स्थापयामास कृष्णम् ॥

ஒன்பதாம் திருவாய்மொழி — மானேய்நோக்குநல்லீர்

स्वामित्वात् संश्रितानामुपकरणरसात् स्वेष्टसंश्लेषकत्वात्
सर्वास्वादत्वभूम्ना कपटवटुतया दारुणापत्सखत्वात् ।
दिव्यस्थानोपसत्त्या भ्रमदरिभरणाच्चापि नारायणत्वात्
अत्यासन्नः श्रितानां भवति हरिरिति प्राह कारेस्तनूजः ॥ ६७

பத்தாம் திருவாய்மொழி — பிறந்தாறும் வளர்ந்தவாறும்

प्रादुर्भावादिवृत्तैः वृषगणदमनात् पूतनाशातनाद्यैः
मोहार्थं बुद्धकृत्यैः गिरिवरभजनस्वीकृतेः स्थानभेदैः ।
तेजोध्वान्तादिभावात् जलनिधिशयनात् भिक्षणाद्यैस्त्रिपद्याः
पीयूषस्पर्शनाद्यैः शिथिलयति हरिः स्वीयहृच्चेत्यथोचे ॥ ६८

इत्थं कारुण्यनिघ्नं दुरितहरजनं प्रेम तीव्रं दुहानं
लोकानां रक्षितारं स्मृतिविषयमहंभावनागोचरं च ।
दीनानां सच्चरण्यं स्वरसकृतनिजप्रेयताचाञ्छमूचे
प्राप्तं शक्तिप्रदं श्रीपतिमिह शतके श्रेयसामेकहेतुम् ॥ (शतकं 5)

---

## ஆறாம் பத்து

முதல் திருவாய்மொழி — வைகல்பூங்கழிவாய்

चक्रित्वात् स्वामिभावात् विपदि सखितया विम्बदन्त्याधरत्वात्
अब्धिश्यामात्मकान्त्या धृततुलसितया निर्जराधीशभावात् ।
रक्ताभास्याङ्घ्रिभावात् पृथुमकुटतयाऽऽश्चर्यचर्याविशेषैः
लङ्काध्वंसाच्च कृष्णं शठजिदकथयत् देशिकद्वारगम्यम् ॥ ७०

### இரண்டாம் திருவாய்மொழி — மின்னிடைமடவார்கள்

पूर्णत्वात् गोपनारीजनसुलभतया लोडनादम्बुराशेः
न्यग्रोधाग्रेशयत्वात् अरिसुभगतया श्रीमहीवल्लभत्वात् ।
निर्दोषोत्तुङ्गभावात् निरवधिकयशस्सद्वशीकारिदृक्त्वात्
मोक्षस्पर्शेच्छया च स्वयमभिसरतीत्याह कृष्णं शठारिः ॥ ७१

### மூன்றாம் திருவாய்மொழி — நல்குரவும்

संपद्दारिद्र्यभावात् असुखसुखकृतेः पत्तनग्रामभावात्
पुण्यापुण्यादिभावात् कपटऋजुतया सर्वलोकादिभावात् ।
दिव्यादिव्याङ्गवत्त्वात् सुरदितिजगणस्निग्धशत्रुत्वकीर्त्या
छायाच्छायादिभावात् अघटितघटनं (कं) प्राह कृष्णं शठारिः ॥ ७२

### நான்காம் திருவாய்மொழி — குரவையாய்ச்சியர்

रासक्रीडादिकृत्यैः विविधमुरलिकावाद्नैः मल्लभङ्गैः
गोपीबन्धार्हभावात् व्रजजननमुखैः कंसदैत्यादिभङ्गैः ।
प्रादुर्भावैः निहीनेष्वसुरभुजवनच्छेदमुख्यैः चरित्रैः
आकर्षेत् सर्वचित्तं हरिरिति कथयामास कारेरपत्यम् ॥ ७३

### ஐந்தாம் திருவாய்மொழி — துவளில்

शङ्खाचक्रादितश्च त्रिदशसुरतया सिन्धुशायित्वभूम्ना
तद्वचोदारभावात् अरुणसरसिजाक्षत्वचिह्नेन देवः ।
देवीभिः सेव्यभावात् अतिसुलभतया स्वेष्वतिस्निग्धभावात्
बन्धुभ्यः स्वान् मुरारिः विघटयति हठादित्यवोचत् शठारिः ॥ ७४

ஆறும் திருவாய்மொழி — மாலுக்கு

पारम्याचैश्च पञ्चायुधविहृतिमुखैः ब्रह्मणः स्रष्टृभावात्
देवानां स्वामिभावादपि सुभगतयाऽलङ्कृतेः कुन्दभङ्गात् ।
प्रादुर्भावैश्च सर्वान्तरनिलयतयाऽहंममत्वेऽर्तिधैर्य
चातुर्यादीनि नृणामपहरति हरिः चेत्यभाणीत् शठारिः ॥ ६५

ஏழாம் திருவாய்மொழி — உண்ணுஞ்சோறு

पारम्यात् भव्यभावात् स्रगभिहितिमुखैः श्रीशतैश्वर्यभूम्ना
स्नेहित्वादाभिरूप्यात् श्रितपरवशतासर्वलोकेशताद्यैः ।
धृत्यादेरादिहेतुं मुरमथनमथ व्याहरत् संश्रितानां
वेदानागस्त्यभाषावपुष उद्धरत् श्रेयसे देहिनां यः ॥ ६६

எட்டாம் திருவாய்மொழி — பொன்னுலகு

लोकस्रष्टृत्वशक्त्याऽऽयुधसुभगतया जिष्णुसारथ्ययोगात्
स्रग्भ्राड्देवेशभावात् गरुडरथतया स्वाश्रिते पक्षपातात् ।
कान्त्या साम्राज्ययोगात् अवतरणदशास्पष्टपारम्यतश्च
स्वीयायत्तस्वभूतिद्वयमथ कथयामास देवं शठारिः ॥ ६७

ஒன்பதாம் திருவாய்மொழி — நீராய்

सर्वात्मत्वात् जगत्याः क्रमणत उत संरक्षणात् विष्टपानां
शत्रुध्वंसात् परत्वाद्यभिमतदशया पञ्चधाऽवस्थितत्वात् ।
निर्वाहाद्दण्डकोट्या बुधदयिततया सर्वशीर्ष्ण्यङ्घ्रिदानात्
मोक्षेच्छोत्पादकत्वात् हरिमथ शठजित् वक्त्यनर्हद्वियोगम् ॥ ६८

பத்தாம் திருவாய்மொழி -- உலகுமுண்ட

आपत्संरक्षणाद्युपकरणतया मेघसाम्यादिभूम्ना
स्वानां विश्वासदानात् सुरगणभजनात् दिव्यदेशोपसत्त्या ।
प्राप्याप्राप्यत्वयोगात् स्वजनविजनयोः सत्प्रपत्तव्यभावात्
ऊचे नाथं शरण्यं श्रुतिशतविदितं वेङ्कटेशं शठारिः ॥ [79?]

इत्थं सद्द्वारगम्यं स्वयमितम् असहृस्थायिनां योजनार्हं
कर्षन्तं स्वैश्चरित्रैः विघटितविजनं स्वान्वितस्तेयदक्षम् ।
भूत्यादीनां निदानं घटकवशमहाभूतियुग्मं शठारिः
वैघट्यस्याप्यनर्हं प्रपदनसुलभं प्राह षष्ठे शरण्यम् ॥ (शतकं 6) ८०

---

## ஏழாம் பத்து

முதல் திருவாய்மொழி — உண்ணிலாவிய

निस्सङ्ख्याश्चर्ययोगादतिमधुरतयाऽथो जगत्कारणत्वात्
न्यग्रोधार्हत्वभूम्ना त्रिदशपतितया वाङ्मनस्सन्निधानात् ।
पीयूषस्पर्शनाद्यैरखिलपतितया लोकसंरक्षणाद्यैः
शाठ्याशङ्कां सहेत त्रितनुरसुरहेत्याह *विश्रान्तिकस्थः ॥ ८१

இரண்டாம் திருவாய்மொழி — கங்குலும் பகலும்

श्रीरङ्गे सन्निधानात् निखिलजगदनुस्रष्टृताद्यैः शुचित्वात्
विध्वस्तानिष्टभावात् उरगशयनतः पुंसु कर्मानुरूपम् ।
शर्माशर्मप्रदानात् जलदतनुतयोपक्रियातत्परत्वात्
स्वामी स्वानां विगर्हामुपशमयति चेत्याह धीमान् शठारिः ॥ ८२

---

* चिन्तान्तिकस्थः

மூன்றாம் திருவாய்மொழி — வெள்ளைச்சுரிசங்கு

पद्माक्षत्वेन हृत्स्थः परमखनिलयः स्वोपकारी विगर्ज-
च्छङ्खोऽनिष्टप्रहर्ताऽऽदरविलसनकृत् रक्षकोऽम्भोधिदृश्यः ।
आपत्संरक्षकः श्रीमकरवरलसत्कुण्डलः स्वाङ्गकान्त्या
स्वेषु स्वं गोप्तृभावं प्रकटयति हरिः चेत्यशंसत् शठारिः ॥ ८३

நான்காம் திருவாய்மொழி — ஆழியெழ

विक्रान्त्या विष्टपानाम् अमृतमथनतः चोद्धृतेर्भूतधात्र्याः
कल्पे लोकादनाच्च क्षितिभरहरणात् दैत्यराजप्रहारात् ।
लङ्कासंङ्कोचकत्वात् असुरभुजवनच्छेदनात् लोकसृष्टेः
धृत्या गोवर्धनाद्रेः स्फुटजगदवनप्रक्रियं श्रीशमाह ॥ ८४

ஐந்தாம் திருவாய்மொழி — கற்பார் இராமபிரானை

साकेते मुक्तिदानात् स्थिरचरजनुषां सर्वशो रक्षकत्वात्
चैद्ये सायुज्यदानात् जगदुदयकृतेः उद्धृतेः भूमिदेव्याः ।
याच्ञार्थं वामनत्वात् शिवभजकमुनेः मोक्षदानाद्युदन्तैः
स्नेहं सर्वाश्रयं स्वं प्रकटयति हरिः चेत्यथाज्ञायि तेन ॥ ८५

ஆறாம் திருவாய்மொழி — பாமருமூவுலகும்

नाभीपद्मोज्ज्वलत्वात् विधिशिवभजनीयाङ्घ्रिभावात् गवां च
त्राणाद्यैः सर्वभूतान्तरनियमनतः संश्रिते भव्यभावात् ।
ब्रह्माद्यापद्विमोक्षात् असुरनिरसनात् त्रातरक्षोनुजत्वात्
स्वीयाक्रन्दापहारी भवति च भगवान् इत्यवादीत् शठारिः ॥ ८६

ஏழாம் திருவாய்மொழி — ஏழையராவி

दृग्भ्यां पद्माकृतिभ्याम् अमरतरुलतानासिकातोऽधरेण
भ्रूचापेन स्मितेनाप्यथ मकरलसत्कुण्डलाभ्यां विशिष्टः ।
फालेनार्धेन्दुभासाऽमलमुखशशिना नेत्रशोभादिभाजा
श्रीमान् देवः किरीटी स्मृतिविशदतनुः भाति चेत्यभ्यधायि ॥ ८७

எட்டாம் திருவாய்மொழி — மாயாவாமனனே

भूतैः चन्द्रार्यमाद्यैः सकलयुगगतैः वस्तुभिः चेतनाद्यैः
स्वैर्लोकानां नियत्या स्मरणतदितरोत्पादनात् माननाद्यैः ।
दुर्ज्ञेयत्वात् स्वभाजां बहुशुभकरणात् वेदसंवेद्यभावात्
धीमानाश्चर्यनानाविभव इति ततः श्रीधरः प्रत्यपादि ॥ ८८

ஒன்பதாம் திருவாய்மொழி — என்றைக்கும் என்னை

स्वामित्वाश्चर्यभावादपि च करुणया दत्तवाग्जृम्भणत्वात्
उज्जीवापादकत्वात् अघटितघटनाशक्तिवैकुण्ठयोगात् ।
शुद्धस्वान्तत्वचक्रायुधजलधिसुतावल्लभत्वात् पितृत्वात्
स्वे स्तोत्रे विष्णुरप्रत्युपकृतिविषये स्वान् युनक्तीत्यगायत् ॥ ८९

பத்தாம் திருவாய்மொழி — இன்பம் பயக்க

वैकुण्ठे नित्ययोगात् श्रितविवशतयाऽनन्तकीर्त्युज्ज्वलत्वात्
शेषे शायित्वरुक्मिण्यभिमतसुरजिद्बाणदोःखण्डनाद्यैः ।
ग्राहग्रस्तेभरक्षाभिरुचितविषये सन्निधानात् शुचित्वात्
स्तोतॄणां दुःखजातं विघटयति हरिः तीर्थपादोऽभ्यधायि ॥ ९०

शाठ्याशङ्कासहिष्णुं प्रशमितजनतागर्हणं स्पष्टरक्षं
व्याकुर्वन्तं स्वरक्षाक्रममखिलजनस्नेहितां दर्शयन्तम् ।
स्वीयाक्रन्दच्छिदोत्कं स्मरणसुविशदं विस्मयार्हद्विभूतिं
स्तोत्रे युञ्जन्तमाह स्तुतिकृदघहरं सप्तमेऽनिष्टचोरम् ॥ (शतकं 7)

---

## எட்டாம் பத்து

முதல் திருவாய்மொழி — தேவிமாராவார்

श्र्याद्यैः पत्न्यादिमत्त्वात् रघुयदुकुलयोरुद्भवात् स्वाश्रितेच्छा-
धीनेहाविग्रहत्वात् सकलचिदचितामन्तरात्मत्वभूम्ना ।
स्वामित्वात् स्वाश्रितावेष्यखिलगुणतया ज्ञानिनामप्यदुःख-
स्थानेच्छापादनाद्यैः हरिरकथि परं दर्शनेच्छोः सुदृश्यः ॥ ९२

இரண்டாம் திருவாய்மொழி — நங்கள் வரிவளை

तार्क्ष्योद्यद्वाहनत्वात् शुभनयनतया नीलमेघाकृतित्वात्
आश्चर्योच्चेष्टितत्वात् दुरवधरतया योगिभिः निर्जरैश्च ।
स्वेषु व्यामुग्धभावात् प्रतिहतिविरहात् दुर्जनादृश्यभावात्
निस्सङ्गानां जनानां सुलभतम इति प्राह नाथः शठारिः ॥ ९३

மூன்றாம் திருவாய்மொழி — அங்குமிங்கும்

श्रीभूमीनायकत्वात् अरिसुकरतया कल्पसिन्धौ शिशुत्वात्
श्रीस्थाने सन्निधानात् सुरहितकरणात् श्रीनिवासत्वयोगात् ।
विक्रान्त्या विष्टपानां विधिदुरधिगमात् स्वेषु सौलभ्यभूम्ना
चैकाकी स्वाश्रितानां विहरणसमये श्रीधरः प्रत्यपादि ॥ ९४

நான்காம் திருவாய்மொழி — வார்கடாவருவி

…न्तेभेन्द्रभङ्गात् शुभनिलयतया साम्यतः चेतरेषां
…स्वायत्तत्वेन भानात् श्रितहृदि सततं देवतद्द्वेषिसङ्गे ।
…मित्रामित्रत्वयोगात् जगदुदयकृतेः देवतात्मत्वमुख्यैः
…श्रीमान् वैकुण्ठनाथः श्रितविहितसमग्रस्वभूमाऽन्वभावि ॥ ९५

ஐந்தாம் திருவாய்மொழி — மாயக்கூத்தா வாமனா

…आश्चर्येहान्वितत्वात् शुभमकुटतया *स्वामिताब्धौशयित्वात्
…जीमूतश्यामलत्वात् श्रितसुलभतया पद्मसूर्योपमाङ्गात् ।
…सारथ्यात् पाण्डुसूनोः अवनिभरहृतेः अन्तरात्मत्वयोगात्
…जीवापेक्षाप्रतीक्षो भवति तदवने श्रीपतिः चेत्यभाणि ॥ ९६

ஆறாம் திருவாய்மொழி — எல்லியும் காலையும்

…आनन्त्यात् श्रीतुलस्या श्रितहृदि शयनात् श्रीद्धवक्षस्कभावात्
आश्चर्योपक्रियत्वात् सुरगणभजनात् वैरिविध्वंसकत्वात् ।
…गोविन्दत्वात् अशेषाभिमतविषयतोऽभीष्टसञ्चित्तकत्वात
…सर्वाकाराद्भुतत्वात् स्वपदवितरणे सज्ज इत्याह कृष्णम् ॥ ९७

ஏழாம் திருவாய்மொழி — இருத்தும் வியந்து

…त्वात् रक्षकत्वात् त्रिजगदधिककारुण्यतो गोपभावात्
…नीलाश्माद्रिप्रभत्वात् स्वजनकृतनिजात्मप्रदानप्रभुत्वात् ।
…मन्दस्मित्या स्थितत्वात् हृदि सुकृतिषु चातर्कितानुग्रहत्वात्
…स्यानां चित्तानपायात् स्वजनहृदि रतो माधवः चेत्यवोचत् ॥ ९८

* …साम्यतो

எட்டாம் திருவாய்மொழி — கண்கள் சிவந்து

प्रासाधन्येन भानात् हृदि च विभुतयाऽलं महिम्ना परत्वात्
माधुर्यात् देहदेह्यादिषु च गततया स्वस्वरूपप्रकाशात् ।
अन्त्यस्मृत्याप्त्यभावात् स्वपरमपुरुषैक्यभ्रमध्वंसकत्वात्
ज्ञानाज्ञानप्रदत्वात् प्रकटयति हरिः पुंसि दास्यं स्वमूचे ॥ ९९

ஒன்பதாம் திருவாய்மொழி — கருமாணிக்கமலைமேல்

वैलक्षण्यात् स्वमूर्तेः मकुटमुखमहाभूषणैः भूषितत्वात्
स्वार्हानेकायुधत्वात् प्रलयसखितयोज्जीवने कर्षकत्वात् ।
भव्यत्वाद्यैश्च सम्पन्निरवधिकतयाऽऽश्चर्यचेष्टत्वयोगात्
निष्ठां दास्ये स्वकीये प्रकटयति हरिः चेत्यथाज्ञायि तेन ॥ १००

பத்தாம் திருவாய்மொழி — நெடுமாற்கடிமை

व्यामुग्धत्वात् स्वकीयेष्वपलघनरुचा वामनत्वेन चाप-
द्बन्धुत्वाश्चर्यभावात् अहितनिरसनात् लोकसृष्ट्यादिशक्तेः ।
अब्धौ शायित्वयोगात् श्रितदुरितहृतेः चातसीपुष्पकान्त्या
त्वाकृष्टेः स्वीयदास्यावधि विशदयतीत्याह नाथः स्वदास्यम् ॥

इत्थं सूरिः दिदृक्षोः दृशिविषयमवैत् निस्स्पृहैरेव लभ्यं
स्वानां विश्लेषभोग्यं श्रितविहितसमग्रत्वभूतिं शठारिः ।
स्वापेक्षासव्यपेक्षं स्ववितरणपरं हृद्गतं स्पष्टयन्तं
दास्यं स्वं तस्य निष्ठां तदवधिमपि चाप्यष्टमे स्वेष्टवश्यम ॥ १०२

---

(शतकं ४)

## ஒன்பதாம் பத்து

### முதல் திருவாய்மொழி — கொண்டபெண்டிர்

आपद्बन्धुत्वकीर्त्या दृढमतिजननात् दैत्यनाशाय भूमौ
जातत्वात् उत्तरस्यां पुरि मधुरपदालङ्कृतायां दयाब्धेः ।
बन्धोः कृष्णस्य पादाश्रयणमिह विना नो सहायः पुमर्थो
रक्षासामर्थ्यहानेः भवति इति हितं कारिसूनुः बभाषे ॥ १०३

### இரண்டாம் திருவாய்மொழி — பண்டைநாளாலே

लक्ष्मीसम्बन्धभूम्ना मितधरणितया पद्मनेत्रत्वयोगात्
स्थित्याद्यैः स्वैः चरित्रैः स्वहृदपहरणात् श्रीगजेन्द्रावनाच्च ।
तार्क्ष्यांसौ चाधिरुह्यारिगणनिरसनात् देवदुष्प्रापताद्यैः
दुष्कर्मोन्मूलनाद्यैः सुचिरकृतदयो माधवः चेत्यवोचत् ॥ १०४

### மூன்றாம் திருவாய்மொழி — ஓராயிரமாய்

नैकश्रीनामवत्त्वात् जगदुदयसुसंस्थापनाद्यैः हरित्वात्
दानात् मोक्षस्य हेयप्रतिभटघटकश्रेणिसम्पत्तिमत्त्वात् ।
प्रह्लादाह्लादकत्वात् वृषगिरिकटके सन्निधानादिकृत्यैः
शार्ङ्गादेः स्वाङ्गदानात् अकथि यदुपतिः शीलरत्नाकरोऽसौ ॥ १०५

### நான்காம் திருவாய்மொழி — மையார் கருங்கண்ணி

लक्ष्मीवक्षस्कभावात् स्वजनसुलभतापर्वतोद्धारणाद्यैः
दुर्ज्ञेयत्वात् सुरादेः अखिलपतितया नाकिनां वृद्धभावात् ।
येषां हृद्वासितायाः स्वजनवशतया तत्र चासक्तिभूम्ना
स्वस्वामित्वादिबन्धात् जगदवति हरिः चेत्यभाणीत् शठारिः ॥

ஐந்தாம் திருவாய்மொழி — இன்னுயிர்ச் சேவலும்

प्राणत्वादद्भुतत्वादपि च सुविदितत्वेन भव्यत्वयोगात्
लक्ष्मीवक्षस्कभावात् रघुकुलजननात् नीलरत्नाभिमूर्त्या ।
कृष्णत्वादब्जदृक्त्वात् परमपतितया चेश्वरं संश्रितानाम्
ऊचे धीमान् शठारिः स्वगुणगरिमसंस्मारकं सर्वदर्शी ॥ १०७

ஆறாம் திருவாய்மொழி — உருகுமால் நெஞ்சம்

आश्चर्येहान्वितत्वात् अखिलपतितया चान्तरात्मत्वभूम्ना-
ऽशक्ये शक्तत्वभूम्ना जलदतनुतया भव्यताकर्षकत्वात् ।
औदार्यादेर्विशिष्टादपि च भवभृतां *रक्षणे तीव्रसंगात्
विस्मर्तुं नैव शक्यो हरिरिति शठजित् कंसजेतारमाह ॥ १०८

ஏழாம் திருவாய்மொழி — எங்கானலகங்கழிவாய்

रम्यत्वात् श्रीतुलस्या श्रितजनसहितत्वेन पद्माक्षतायाः
स्वामित्वात् सत्परञ्ज्योतिरिति कथनतः श्रीधरत्वातिकीर्त्या ।
पुष्पश्यामत्वभूम्ना रथचरणमुखस्वायुधत्वाद्युदन्तैः
शौरेर्धीमान् शठारिः घटकमुखसुविस्रम्भणीयत्वमाह ॥ १०९

எட்டாம் திருவாய்மொழி — அறுக்கும் வினையாயின

वल्लीमध्यत्वयोगादपि च सुविदितश्रीवचोवाच्यभावात्
भूम्याद्यैश्वर्ययोगात् अवतरणदशासाहचर्यात् स्वभर्तुः ।
सन्धातृत्वात् सुबोधप्रददुरितहरत्वात् समासन्नभावात्
लक्ष्म्याः श्रीशं शठारिः प्रथयति च सुमज्ञानिभावेन नाथम् ॥ ११०

---

* रक्षणे अतिप्रसङ्गात्

ஒன்பதாம் திருவாய்மொழி — மல்லிகை கமழ் தென்றல்

[illegible]ाक्षत्वप्रसिद्ध्या जगदवनतया भव्यतार्यैश्च सार-
ग्राहित्वात् वेणुनादैः द्रुषितजनतया स्वाङ्गदानादजादेः ।
[illegible]ामत्वाद्गव्यचोरत्वत उत सरसस्मेरचेष्टत्वभूम्ना
नः कूटस्थोऽत्र सिद्ध्युन्मुखसमयतया ख्यापयामास कृष्णम् ॥ १११

பத்தாம் திருவாய்மொழி — மாலை நண்ணி

[illegible]श्रैष्ठ्यात् स्वकीयैरपि जगदवनात् अण्डषण्डाधिपत्यात्
लीलाया वल्लभत्वात् अमृतवितरणात् भक्तसुस्निग्धभावात् ।
[illegible]लानां सत्यभावात् अतिसुजनतयाऽथो जगत्कारणत्वात्
श्रीमान् वेलाप्रतीक्षो भवभयहरणे चेत्यभाणीत् शठारिः ॥ ११२

[illegible] सर्वैकबन्धुं चिरकृतकरुणं शीलसिन्धुं पतित्वात्
संबन्धाद्रक्षितारं स्वगुणगरिमसंस्मारकं प्राह कृष्णम् ।
विस्मर्तुं चाप्यश[illegible] घटकमुखसुविस्रम्भणीयं सुमत्या
लक्ष्म्या श्लिष्टं स्वसिद्ध्युन्मुखसमयमनेहः प्रतीक्षं सुमित्रम् ॥ ११३

(शतकं 9)

---

## பத்தாம் பத்து.

முதல் திருவாய்மொழி — தாளதாமரை

[illegible]स्यानां नाशकत्वात् विधृततुलसिकामौलिभावाज्जयित्वात्
सर्पाधीशेशयत्वात् निरवधिकपरंज्योतिरुल्लास्यभावात् ।
लोकाना स्रष्टृभावात् दशरथसुतताश्रान्तिहारित्वमुख्यैः
आकारैः सद्गतिः स्यात् जलदतनुरुचिश्चेति तेनाभ्यधायि ॥ ११४

இரண்டாம் திருவாய்மொழி — கெடுமிடராய

ऊचे श्रीकेशवत्वाद्भुतचरितखगाधीशकेतुत्वयोगात्
आसन्नत्वात् पतित्वात् अमरपरिषदामादिभूतत्वभूम्ना ।
व्यापारैस्सृष्टिमुख्यैरपि च भुजगशायित्वमुख्यैश्चरित्रैः
अध्वक्लेशापहर्ता भवति च भगवानित्यनन्यः शठारिः ॥ ११

மூன்றாம் திருவாய்மொழி — வேய்மருதோளிணை

अम्भोजाक्षत्वकीर्त्या यदुकुलजतया चात्मनश्श्यामलत्वात्
गोविन्दत्वात् प्रियोद्यद्वचनपरतया चक्रराजायुधत्वात् ।
श्रीनीलाश्मप्रभत्वादतिसुभगतया गोपनिर्वाहकत्वात्
अस्थानस्नेहशङ्कास्पदरस उदितः श्रीपतिः कारिजेन ॥ ११६

நான்காம் திருவாய்மொழி — சார்வே தவநெறிக்கு

श्रीमद्दामोदरत्वात् अमरपरिषदामप्यगम्यत्वभूम्ना
चक्राधीशायुधत्वात् वटदलशयनात् नागराजेशयत्वात् ।
वक्षःस्पर्शोन्मुखत्वात् परमपुरुषतामाधवत्वादियोगात्
दुष्प्रापोऽयं भजद्भिः सुगम इति दृढं माधवं सोऽभ्यधत्त ॥ ११७

ஐந்தாம் திருவாய்மொழி — கண்ணன் கழலிணை

नाम्नां संकीर्तनेन स्वपरिवृढतया भावनातोऽनुवेलं
संस्मृत्या पुष्पदानाध्ययननिवचनैः स्तोत्रनृत्तादिकृत्यैः ।
धर्मैर्वर्णाश्रमोक्तैः बहुविधभजनप्रक्रियो दीर्घबन्धुः
श्रीमान्नारायणश्चेरदकथयदखिलद्रामिडब्रह्मदर्शी ॥ ११८

ஆறாம் திருவாய்மொழி — அருள்பெறுவாரடியார்

चक्रित्वात् केशवत्वादिभिरपि च तथा श्रीशनारायणत्वात्
स्नेहित्वात्पाण्डवानामभिमततुलसीपूजनीयत्वभावात् ।
अम्भोजाक्षत्वगोविन्दत उत सुयशःश्रीपतित्वादिभावैः
श्रीमान् तीव्रोद्यमोऽयं स्वपदवितरणे चेति तेनाभ्यभाषि ॥ ११९

ஏழாம் திருவாய்மொழி — செஞ்சொற்கவிகாள்

अत्याश्चर्यस्वभावात् हृदयगततया स्वस्तुतौ प्रेरकत्वात्
स्वामित्वात् सर्वभूतान्तरनुगततया स्वस्तुतौ कर्तृभावात् ।
आपद्बन्धुत्वयोगात् बहुविधलविधस्थानवत्त्वेन देवः
श्रीमानत्यादरः स्यात्स्वजनपरिकरेष्वित्यथो संजगाद ॥ १२०

எட்டாம் திருவாய்மொழி — திருமாலிருஞ்சோலை

लक्ष्मीकान्तत्वयोगात् विपदि सखितया दिव्यदेशस्थितत्वात्
मोक्षोद्योगात्तदर्थं कृतशपथतया सर्वतस्सन्निधानात् ।
स्वपन्तस्सन्निवासादतिवितरणतः स्वस्वभावप्रकाशात्
स्वामित्वात्तुष्यतीत्थं स्वयमनुपधितः श्रीपतिश्चेत्यगायि ॥ १२१

ஒன்பதாம் திருவாய்மொழி — சூழ்விசும்பணிமுகில்

स्वामित्वात् श्रीशनारायण इति यशसा विक्रमाद्विष्णुभावात्
श्रीमत्त्वात् चक्रवत्त्वात् जलनिधिशयनाच्चापि गोविन्दभावात् ।
वैकुण्ठस्वामिभावादपि च निजजनार्चिरादि‍ाख्यगत्या
स्वं लोकं प्रापयेच्छ्रीपतिरिति कथयां श्रीशठारिर्बभूव ॥ १२२

ब्रह्मेशान्तःप्रवेशात् जलनिधिसुतया सन्निरोद्धव्यभावात्
दिव्यश्रीविग्रहत्वात् अखिलतनुतयाऽऽत्तपीयूषभावात् ।
पद्मावन्धुत्वभूस्युद्धरणकरणतः पुण्यपापेशितृत्वात्
मुक्तेर्दातानुभाव्यो हरिरिति शठजिद्दर्शयन् मुक्तिमाप ॥ १२३

एवं स्वानां गतिं व्यध्वजदुरितहरास्थानशङ्काहरागं
सुप्रापं भक्तिभाजां बहुविधभजनप्रक्रियं श्रीशठारिः ।
तीव्रोद्योगं स्वदाने स्वजनतनुकृतात्यादरं प्राह चान्ते
स्वेच्छातुष्टं सुखार्चिर्मुखसरणिमुखं मोक्षदं मुक्तभोग्यम् ॥ १२४

(शतकं 10)

---

## ॥ निगमनम् ॥

इत्थं सेव्यं सुभोग्यं शुभसुभगतनुं सर्वभोग्यप्रकृष्टे
श्रेयस्तद्धेतुभूतं प्रपदनसुलभं स्वाश्रितानिष्टजिष्णुम् ।
भक्तच्छन्दानुरक्तं निरुपधिसुहृदं सत्पदव्यां सहायं
श्रीशं प्राह स्वसिद्धेः स्वयमिह करणं स्वप्रबन्धे शठारिः ॥ १२५

आद्ये स्वीयप्रबन्धे शठजिदभिदधे संसृतेर्दुस्सहत्वं
द्वैतीयीके स्वरूपाद्यखिलमथ हरेरन्वभूत् स्पष्टदृष्टम् ।
तार्तीयीके स्वकीयां भगवदनुभवे स्फोरयमास तीव्राम्
आद्यां तुर्ये यथेष्टं भगवदनुभवादाप मुक्तिं शठारिः ॥ १२६

श्रीमान् सीमातिलङ्घिस्थिरतरकरुणः सर्ववित् सर्वशक्तिः
स्वामी सर्वस्य जन्तोः स्वचरणयुगलस्वीकृतास्माकभारः ।
किं नः कृत्यं स्वहेतोः किमिह न सुलभं का विपत्तिर्भवित्री
कस्यान्यास्याद्य वर्ण्या वयमिति विदुषामाह तुङ्गत्वमन्ते ॥ १२७

(उपदेशमर्याः)

शास्त्रे देहातिरिक्तात्मनि तदधिपतौ तत्प्रसादाद्युपाये
तस्मान्निःश्रेयसाप्तौ तदपचरणतोऽनन्ततापाभिघाते ।
तद्भक्तानां प्रभावे तदुपसदनतः स्वान्तकालुष्यशान्तौ
सारं वेद्यं स्ववेदे सकलमकथयत् सानुकम्पः शठारिः ॥ १२८

इत्थं सत्संप्रदायक्रमसमधिगताशेषवर्णार्हवेद-
श्रद्धाशुद्धाशयानामघटयदनघं कौतुकं वेङ्कटेशः ।
सम्यक्त्वे तस्य साक्षात् शठरिपुरथवा सर्वसाक्षी स साक्षी
सावद्यत्वेऽपि सोढुं प्रभवति भजतामप्रकम्प्यानुकम्पः ॥ १२९

शोकः श्लोकत्वमभ्यागत इति वदतः शुद्धबोधार्णवोद्य-
ज्ज्ञानाकल्लोलनाथानुभवरसपरीवाहतः श्राव्यवेदात् ।
वेदान्ताचार्यकश्रीबहुमतबहुविद्वेङ्कटेशोद्धृतेयं
रम्या तात्पर्यरत्नावलिरनघगुणा रञ्जनी रङ्गभर्तुः ॥ १३०

इति

कवितार्किकसिंह-सर्वतन्त्रस्वतन्त्र-श्रीमद्वेदान्ताचार्यस्य कृतिषु

द्रमिडोपनिषत्तात्पर्यरत्नावलिः

समाप्ता ।

Conclusion of Volume 1. Continuation in Volume 2